यन् वर्त्तते॥ तनुप्राप्नोति अचलः॥ संचाररहितः॥ ५२॥ श्रीहरप्रा॰

निःशौचो मलदिग्धांग अलिंगितवरोषितः॥

ध्यायन्नसुलभान् भोगान् केवलं वर्त्ततेचलः॥ ५२

सर्वेंद्रियक्रियालोपाद्धास्यतेबालकैरपि॥ त

१५ तो मृतिजदुःस्य दृष्टांतो नोपलभ्यते॥ ५३॥ श्री

सर्वेंद्रियक्रियालोपाईंद्रियपाटवस्यच्युतत्वात्॥ बालकैरपिना

स्त्रीभिरपिहास्यते॥ यस्मात्कारणात् परां मृजं अधिकतरव्याध्या

॥दिकं प्राणानि भूतानि जीवराशयः ॥ बिभ्यति ॥ अंतःकरणात् मृत्ति
जः दुःख्यप्राणवियोगकालीनदुःखस्य दृष्टांततो शास्त्रतो भावा
च्चैनोपलभ्यते मृत्युर्वाजंतुजनन न धर्माजीवः ॥५४॥ श्रीरामसमर्थः

यस्माद्बिभ्यति भूतानि प्राणान्यपि परांप्रज्ञं ॥ रु
नीयंते मृत्युनाजंतुः परिष्वक्तोपि बंधुभिः ॥५४॥
सागरांतर्जलिगतो गरुडेनेव पंनगः ॥ हा कांते
हा धनं पुत्राः क्रंदमानः सुदारुणं ॥५५॥ श्रीसांब

हा कांते त्वयाकष्टं प्राप्स्यंते हा पुत्राः भवंतां त्राता कोपि नास्तीति
अध्यासेनं सुदारुणं यथा क्रंदमानः अक्रोशन् ॥५५॥ श्रीहरयनमः

ननु यथा गवामपहर्त्ता ग्रामाद्ग्रामांतरं नयति तथा मृत्युरपि देहा
द्देहांतरं नयतीति तत्र कथं दुःखं क्रियत्ते अत आह। मर्मस्विति
प्राणवायुना मर्मसु उत्कृष्यमाणेषु। आकृष्यमाणेषु संधिषु मु

मंडूक इव सर्पेण मृत्युनानीयते नरः॥ मर्मसू
त्कृष्यमाणेषु मुच्यमानेषु संधिषु॥ ५६॥ श्रीहरः

च्यमानेषु सिथ्यमानेषु सत्सु म्रियमाणस्य यद्दुःखं मुमुक्षुभिः॥
स्मर्यतां। तथा च मरणस्यैतादृशदुःखव्याप्तत्वात्। तद्यथा न भव
ति तथा मोक्षार्थं यत्नतः कर्तव्य इति मोक्षे प्राणोत्क्रमणाउत्क्रामं

तीतिश्रुतेरिति भावः॥५६॥ ननु दुःखस्य पापजन्यत्वात्प्रायश्चित्तरव
नश्चितेन पापेन नष्टे मरणे तादृकदुःखं न भवेदित्याह॥ दृष्ट्वा वा
क्षिप्यमाणायामिति॥ संह्रियमाणायां सत्यां ह्रियमाणया संज्ञ

यद्दुःखं म्रियमाणस्य स्मर्यतां तं दृष्ट्वा वा
क्षिप्यमाणायां संज्ञया ह्रियमाणया॥५७॥ [मुमुक्षुभिः॥]

या उपलक्षितस्य मृत्युपाशेन बद्धस्य प्राणिनः त्रातानैवोपलभ्य
ते इतरपापस्य प्रायश्चित्तैर्नाशसन्मुमुक्षुभिः॥ त्वेपिमरणप्रयोज
कपापस्य नाश्यत्वादिति भावः॥५७॥ श्रीजानकीपतियनमः॥

करणदौर्बल्येन ज्ञानदौर्बल्या तत्कालीनावस्थामाह ॥ संरुध्यमा
न इति ॥ नमसाज्ञानेन संरुध्यमानः महच्चित्त तदवस्थांविशेषं ॥

मृत्युपाशेन बद्धस्य त्राता नैवोपलभ्यते ॥ संरु
ध्यमानस्तमसा महच्चित्तमिवाविशन् ॥ ५८ ॥
उदाहूतस्तदाज्ञातीनीक्षते दीनचक्षुषा ॥ अयः
पाशेन कालेन स्नेहपाशेन बंधुभिः ॥ ५९ ॥ श्रीहरः

आविशन्निव कथंचित्संज्ञां प्राप्तः सन् उदाहूतस्तदादीन् चक्षुषा
ज्ञानेऽक्षते ॥ ५८ ॥ तथा तेन प्रकारेण परितह्यते मयेयमवस्थाप्रा

सेति विचारयतीति भावः॥५९॥ इदानीमीश्वरस्मरणादिकमपि दुर्घटमित्याह॥ हिक्कयेति॥ हिक्काया ऊर्ध्ववायुना परायणं कृतपाप

आत्मानं कृष्यमाणं तमीक्षते परितस्तथा॥ हि स्य

क्कयाबाध्यमानस्य श्वासेन परिशुष्यतः॥६०॥

मृत्युना कृष्यमाणस्य न खल्वस्ति परायणं।

संसारयंत्रमारूढो यमदूतैरधिष्ठतः॥६१॥ श्री॰

स्येश्वरस्मरणमपि दुर्घटमिति॥६०॥ संसारयंत्रमारूढः पुनःपुनर्भ्रमणसाधनत्वात्॥६१॥ कयास्यामिति॥ प्राप्तिविषयः किंकरोमी

त्कपायविषयः क्वगच्छामीति मार्गविषयः किंगृह्णामीति आवलंबन
विषयः किंत्यजामिति निषिद्धत्यागविषयः ॥ एवंप्रकारैतिकर्तव्यतामू
ढःसन् कृच्छ्रात्क्लेशेन देहात् ॥ असून्प्राणान्त्यजतीति योजना ॥ ६२ ॥ ६३

क्वयास्याम्यति दुःखार्तः कालपाशेनयोजितः ॥
किंकरोमि क्वगच्छामि किंगृह्णामि त्यजामि किं ॥ ६२ ॥
इतिकर्तव्यतामूढः कृच्छ्राद्देहात्त्यजत्यसून् ॥
यातनादेहसंबद्धो यमदूतैरधिष्ठितः ॥ ६३ ॥

ननुमरणदुःखमपि सुखमेवानंतरसुखानुसंधानादित्यत आहयातनादेहेति ॥ इतोलोकात् ॥ तद्गंतुं कुतः सह तैश्श्रमस्तेवक्तुमपिनवा ॥

न्कोत्तिकिमुत्तानुभवितमित्तिभावः॥६४॥तदेवंदेहाभिमानवृत्तादेव उत्पत्त्यादिमरणांतदुःखसाधनत्वमेवोत्क्वांतदाभिमानाभावेदुःख

इतोगत्वानुभवंति,यायास्तायमयात्तनाः॥ ता
सुयद्धभत्तेदुःखंतद्धकुंसहतेकुतः॥६४॥कर्पू
रचंदनाद्यैस्तुलिप्यंत्तेसहतेहितत्॥भूषणै॥
र्भूष्यंतेचित्रैःसुवस्त्रैःपरिवीयते॥६५॥श्री०

मेवनास्तीत्तिनश्वरत्वादिनाचंहेयत्वंवक्तुंमाह कर्पूरेति॥यत्वपुः
सततंतदेहमभिमानकालेकर्पूरचंदनाद्यैर्लिप्यंत्तें॥भूषणैर्भूष्यंत्ते

सूत्रस्नेहैः संधीयन्ते संबध्यन्ते ॥ ६५ ॥ जीवत्यक्तं ॥ अहमपि मानश्शून्यं नु तन्वपुः ॥ अस्पृश्यं अप्रेक्ष्यं अनवलोकनीयं जायते ॥ न केवलमेतावदेव किंतु नः निःकाशयंतीति पुनरपिनश्वरत्वमाह ॥ पुनर्नर्दृश्यत इ ६६ ॥ ६७

अस्पृश्यं जायते प्रेक्ष्यं जीवत्यक्तं तदा वपुः ॥ निष्काशयंति निलयात्क्षणं न स्थापयंत्यपि ॥ ६६ ॥
दह्यते च ततः काष्ठैस्तद्भस्मी क्रियते क्षणात् ॥
भक्ष्यते वा सृगालैश्च गृध्रकुक्कुटवायसैः ॥ ६७ ॥

ति ॥ भस्मीकृतोपि सृगालादिभिः ॥ क्षितो वा पुनर्दहाद्य अनंतरं न दृश्यते देह इति शेषः ॥ स इति पुंनिर्दिशान् ॥ एतादृशमानुषदेहादि ॥

मा

॥द्विवगी०॥ प्रात्यौनियें भावादित्ति॥ ६८॥ मामेत्ति॥ इयंमेमात्तासोपित्तेत्यादि ॥अ०॥
॥३०५॥ प्रतिज्ञामायोपमेइंद्रजालसदृशोजगत्तिकस्यपुरुषस्यभवेत् संवि ॥८॥
दागूःप्रतिज्ञानमित्यमरः॥ यतःकाकारणात्कर्मपुरःसरःशुभा

पुनर्नदृश्यतेसोपिजन्मकोटिशतैरपि॥ ६८॥
मात्तापित्तागुरुजनस्वजनोममेत्तिमायोपमे॥
जगत्तिकस्यभवेत्प्रत्तिज्ञा॥ एकोयतोव्रजतिक
र्मपुरःसरोयंविश्रामवृक्षसदृशःखलुजीवलोकः॥ ६९॥ ७०॥ ७१॥

शुभकर्मपुरःसरःअयंजीवलोकःजीवितलोक्यतमनुष्योहमित्तिदे
हःव्रजतिविश्रामवृक्षसदृशः॥ ६९॥ गर्भस्त्रीगर्भेशुक्रपातात्शुक्र ॥३०५॥

शोणितसंसर्गमारभ्यमरणपर्यंतं महदुक्तं दुःखसंबद्धं नानावस्था युतं तद्देतस्यस चासावेषं तद्देतस्य दुःखात्मकृतयोक्तस्यैतस्यतथैवानुभूयमानस्यमहाव्याधेः वैद्यकोक्तभेषजैरनिवर्त्यत्वात् नचैव

सायंसायं वासवृक्षं समेताः प्रातःप्रातस्तेनतेन प्रयांति ॥ त्यक्त्वान्योन्यं तंच वृक्षं विहंगास्तद्वज्ज्ञातयो ज्ञातयोश्च ॥ ७० ॥ मृत्तिबीजं भवेज्जन्मजन्मबीजं भवेन्मृतिः ॥ घटियंत्रवदश्रांतो भ्रमत्यनिशंनरः ॥ ७१ ॥

तानिवर्त्यत्वमित्याह ॥ मत्त इति मत्तोन्यो ब्रह्मादिर्भेषजं न भवतिअहमेव भेषजं ॥ व्याधिनिवर्तक इति यावत् ॥ स्वस्य संसारभेषजत्वंभि

॥शिवगी॰॥ षकूश्रेष्ठत्वात् तथाच मंत्रवर्णः॥ भिषक्तमं त्वां भिषजां शृणोमिति श्रु ॥अ॰ ९॥
॥३०६॥ तिंतरेपि अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषगित्ति। तथाच मन्त्रसा
हिनैव तव सर्वसिद्धिरिति अतएव मंत्रवर्णोपि यानेरुद्रशिवातनूरि

गर्भे पुंसः शुक्रपाताद्यदुक्तं मरणावधि ॥ तदेतस्य-णा
महाव्याधेर्मत्तोनान्योस्तिभेषजं॥ ७२॥ श्रीहरः॥

त्यादि॥ अध्यात्मिकादितापत्रयनिवृत्तिपूर्वकजीवनप्रार्थनं प्रतिपा
दयन् सर्वानर्थनिर्वृत्तिः रुद्रदेवेत्ति बोधयतीति॥ ७२॥ इति श्री अया
जीदीक्षितविरचितायां शिवगीताटीकायां देहोत्पत्त्यादिकथनं ॥३०६॥

नामअष्टमोध्यायः॥ ८ ॥ ७ ॥श्रीगौरिशंकरायनमः॥श्रीसांब

इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुब्र
ह्मविद्यायांयोगशास्त्रेशिवराघवसंवादेदेहेजी
वोत्पत्तिमरणयोगोनामाष्टमोध्यायः॥८॥७॥
श्रीसांबसदाशिवायनमः॥श्रीउमापतिप्रसंन्न

श्रीमाहादेवप्रसन्नोस्तु॥ ७ ॥श्रीउमारमणायनमोनमः॥

पूर्वेध्याये रामेण पांचभौतिकादेहस्योत्पात्सादौ पृष्टे तत्रोत्पत्तिस्थि
तिलयान्निरूप्येदानीं स्वरूपंचेति प्रश्नोत्तरं वक्तुमारभते भवान्
देहस्वरूपमिति प्रज्ञापत्यक्रमांदत्तुकाले प्रयोग इत्यक्तश्चेत्यर्थे

श्रीशिव उवाच देहस्वरूपंवक्ष्यामिश्रृणुष्वाव
हितोनृप मत्तोहिजायते विश्वंमयेयेवं तत्प्रधार्यते ॥१

पूर्वेध्याये प्रतिपाद्यास्मिनध्याये पंचात्मकं पंचसुवर्तमानं षडा
श्रयं षड्गुणयोगयुक्तं संतप्तधातुं चिमलं द्वियोनिं चतुर्विधाहार
मयंशरीरमिति मंत्रं वर्णयन् आशेद्वियोनिमित्येतद्विवृणोत्ति
त्रिभिमत्तोहीती विवर्तेषादानत्वमभिहितं तज्जलानिति शां

तउपासीनेति॥ सकलजगधिष्ठानभूतनिष्कलस्वरूपमह॥ अहंतु
निर्मलइति॥ तत्रहेतुपूर्वाइत्यादिनत्वेवंशुद्धब्रह्मणोजगदुपादाने
त्वंवाकथं॥१॥ इत्याहसच्चिदानंदविग्रहइति॥२ सच्चिदानंदासंगोद्दा

मय्येवेदमधिष्ठानेलीयतेशुद्दरूपवत्॥ अहंतु
निर्मलंपूर्णःसच्चिदानंदविग्रहः॥२॥ असंगो
निरहंकारःशुद्धंब्रह्मसनातनः॥ अनाद्यविद्या
युक्तःसनजगत्कारणातांव्रजे॥३॥ श्रीरामः

स्प सीननिःष्टृस्पाहंकारस्वरूपत्वात्शुद्धब्रह्मेति अनाद्यविद्ययायुक्तः
सनजगत्कारणातांव्रजेइष्छांदसः॥३॥ श्रीसितापतियनमः॥

द्वितीयां परिणामिनीं योनि मह ॥ अनिर्वाच्येति महाविद्यामूला विद्यातो भिन्ना ॥ जगदाकारपरिणामेन काप्यनुपपत्तिः ॥ विचित्रप्रपंचरचने ह को हेतुरित्यत आह त्रिगुणेति ॥ सत्वं रजस्तम इति

अनिर्वाच्या महाविद्या त्रिगुणा परिणामिनी ॥
रजः सत्वं तमश्चेति तद्गुणाः परिकीर्तिताः ॥ ४ ॥
सत्वं शुक्लं समादिष्टं सुखज्ञानास्पदं नृणां ॥ दुःखास्पदं रक्तवर्णं चंचलं च रजो मतं ॥ ५ ॥ श्री०

वक्तव्ये पि लोहितशुक्लकृष्णमिति श्रुत्यभिप्रायेणोक्तं ॥ ४ ॥ सत्वं शुक्लं समादिष्टं श्रुत्यादिभिः ॥ अत एवोक्तं सत्वात्संजायते ज्ञानं चेति दुः

खास्यदं दुःखपरिणामप्रयोजकं चं चलं च रजोमतं श्रुतिसंमतं ॥५॥
जडं आवरणप्रयोजकं तं द्रालस्यादिनेत्ति ॥ नन्वविद्याया उपाद
नत्वेदिवात्मशक्तिं स्वगुणैर्निगूढामित्युक्तशक्तिमत्त्वमसंगतमित्य

तमः कृष्णं जडं प्रोक्तमुदासीनं सुखादिषु ॥
अतो मम समायोगाच्छक्तिः स्यात्त्रिगुणात्मिका ६॥

त आह अतो ममेति त्रिगुणात्मिका गुणत्रयावच्छिन्ना साविद्या
शक्तिरित्यभिधीयते ॥ तत्र हेतुरतो ममसमायोगादिति ॥ तस्याः
परिणाम्युपादानत्वेपि मयि विद्यमानत्वेन शक्तित्वमिति नोपाद

नशक्तित्वयोर्विरोध इतिभावः ॥६॥ ननु अन्याकारस्यान्याकारेणपरिणामः कथमित्यत आह ॥ अधिष्ठानइति ॥ अधिष्ठानत्वं परिणामेन । विद्याश्रयत्वं तस्य सविभ्रियत्वं ॥ विश्वरूप

अधिष्ठाने तु मय्येव भजन्ते विश्वरूपतां ॥
शुक्तौ रजतवद्रज्जौ भुजंगो यद्वदेव तु ॥७॥ आ
काशादीनि भूतानि जायन्ते मायया मम ॥ तै
रारब्धमिदं सर्वं देहोयं पांचभौतिकः ॥८॥

तां सकलप्रपंचात्मकतां भजन्ते ॥ पंचात्मकं पंच सुवर्तमानमित्याह आकाशादीनिभूतानीति ॥ तैरिदं विश्वमारब्धं पांचभौ

तिकोपिदेह आरब्धः॥ ७॥ षडाश्रयमितिश्रुतिं विवृणोति॥ ८॥ पितृभ्या
मशितादन्नादिति। एतत्षाट्कोशकं शरीरं। त्रीणिपितृतस्त्रीणि
मातृतः अस्थिस्नायुमज्जाचइतिपितृतः॥ त्वङ्मांसरुधिराणिमा

पितृभ्यामशितादन्नात्षट्कोशंजायतेवपुः॥
स्नायवोस्थीनिमज्जाचजायंतेपितृनस्तथा॥ १॥

तृतइतिविभागेनश्रुत्युक्तषाट्कोशकत्वमुपपादयति। स्नायवइत्या
दिना॥ त्वक्चर्मचकारः॥ पूर्वोक्तसमुच्चयार्थः॥ १॥ इदानींषड्गुणयो
गयुक्तमितिश्रुतिंविवृणोतिभवाइति। तस्यशरीरस्यसंबंधिनःभा

॥वा॥१०॥ तत्र मातृजपितृजभावद्विकमाह ॥ मृदव इति मेदः पार्श्वस्थितो मंडकाकारः मेदस्तु वसा वपेत्यमरः ॥ माद्यपि मज्जापितृभवत्वेन गणितस्तथापि मृदुत्वाभिप्रायेण मातृजेषु पुनर्गणनं ॥ पित्र्यं शाधि

त्वग्मांसं शोणितमिति मातृतश्च भवंति हि ॥
भवाः स्युः षड्विधास्त्वस्य मातृजाः पितृजास्तथा ॥१०॥
रसजास्तामसाः सत्वसंभूताः स्वात्मजास्तथा ॥
मृदवः शोणितं मेदो मज्जा प्लीहा यकृद्गुदं ॥११॥

वस्थाभिप्रायेण तत्रपाठ इति ॥ मज्जा वसंतकालीनविलिनघृताकारो द्रवि भूतोस्थिमध्यस्थितो धातुविशेषः ॥ प्लीहा गुल्माख्यो मांसखं

डःयकृत् ॥ अवस्थितियोग्यकालाकारकृष्णमांसविशेषः । गुदं पायुः

इतिमातृभावाः ॥ स्मश्रुपुंमुखेप्रवृद्धानिरोमतनूरुहाःकचाःशिरोरु

हाःस्नायवःअस्थिबंधननाडीविशेषाःशिरःप्रसिद्धंधमनयःवायु

हृन्नाभीत्येवमाद्यास्तुभावामातृभवामताः ॥

स्मश्रुरोमकचास्नायुशिराधमनयोनखाः ॥ १२ ॥

दशनाःशुक्रमित्यादिस्थिराःपितृसमुद्भवाः ॥ श

रीरोपचितिवर्णोवृद्धिस्तृप्तिर्बलंस्थितिः ॥ १३ ॥

वाहिन्योनाड्यः ॥ १२ ॥ तृतीयभावानाह ॥ शरीरोपचितिरिति ॥ पुष्टता

बलशरीरस्यास्थितिःभुक्तपित्तरशानशरीरस्यामबंधनं ॥ तेनचजीव

धारणं तदेव स्थितिः ॥ इदं सर्वं रसाख्य धातुविशेषात् ॥ ज्ञातं रसजं च
पुत्रोजन्म वृद्धिर्निवृद्धिरलौलत्वेति वैद्यकेभिधानात् ॥ अलौल्यं स्पृ
हित्वं उत्साहः व्यापारः आदिशाग र्भाभिगमनादि इति रसजाः च तु

अलौल्यमुत्साहमित्यादीन् रसजान्विदुः ॥ इ
च्छाद्वेषः सुखं दुःखं धर्माधर्मौ च भावना ॥ १४ ॥

लो प्रय... ज्ञानमायुश्चेंद्रियाणीत्येवमात्मजाः ॥
ज्ञानेंद्रियाणि श्रवणं स्पर्शनं दर्शनं तथा ॥ १५ ॥

र्थ भावानाह इच्छेति ॥ १४ ॥ इंद्रियाणीत्येवमात्मजाः ॥ अंतःकरणोपाधु
पहितआत्मनि आध्यासात् तथोक्ताः ॥ एवमन्यत्र उपाधिविशेषाभिप्रा

येण न तज्जन्येत्वमूह्यमिति श्रवणं श्रूयते नेनेति तज्जन्य व्यापारः ॥ एवमु
न्नरत्रापि रसनं रस्यते ऽनेनेति घ्राणं जिघ्रत्यनेनेति ॥ १५ ॥ शब्दः रणन
ध्वनि भेदेन द्विविधः स्पर्शः ॥ शीतोष्ण मृदु कठिनत्वेन च ॥ १६ ॥ वचनं सु

रसनं घ्राणमित्याहुः पंच तेषां च गोचराः ॥ शब्दः स्प
र्शस्तथा रूपं रसो गंधश्च इति क्रमात् ॥ १६ ॥ वाक्कराङ्घ्रि
गुदोपस्थान्याहुः कर्मेंद्रियाणि हि ॥ वचनादानगम
नं विसर्ग रतयः क्रमात् ॥ १७ ॥ श्री सदाशिवा नमः

वाक्य दुर्वाक्ये आदानं दान व्यादि नव्यादि ॥ रतिः क्रीडा ॥ १७ ॥ तेषां इंद्रि
याणां क्रियाः ॥ अथो भयंद्रिय साधारणमंतःकरणं प्रपंचयति ततः त्ते

न्यः इंद्रियभ्यः परं उत्कृष्टं तदंतःकरणं चतुर्विधं ॥ ३८॥ कल्पाद्यासंकल्पविक
ल्पाख्याः सुखमारभ्य विकल्पाद्या मनसः क्रियाः कर्माणि बुद्धेः निश्च
या ॰॥ इदमिष्टमेवेति निश्चयः स्वरूपं यस्याः आहं ब्रह्मचारी ममेदं धना

क्रियास्तेषां मनो बुद्धिरहंकारस्ततः परं ॥ अंतःक
रणमित्याहुश्चित्तं चेति चतुष्टयं ॥ ३८॥ सुखदुःख
च विषयौ विज्ञेयौ मनसः क्रियाः ॥ स्मृतिभीतिर्वि
कल्पाद्या बुद्धिः स्यान्निश्चयात्मिका ॥ ३९॥ श्रीसांब

दि इति अभिमानः आहंकारः चित्तं चेतयते चिंतां करोति ॥ ३९॥ सत्वसं
भूत पंचमभावानाह ॥ सत्वाख्यमंतःकरणमिति ॥ थैं गरहस्यब्राह्मणे तदे

तत्सत्वंयेन स्वप्नंपश्यतीतिअतःकरणस्यैवसत्वशब्दप्रयोगःमतंश्रुत्या
दिभिःसत्वात्सत्स्थादंतःकरणात्॥ आस्तिक्यंपरलोकोस्तिशुक्लंशुद्धंक
र्मधर्मैकरुचिधर्मेएकाअसाधारणारुचिःमतिःप्रकृतिःप्रधानंयेषां

अहंममेत्यहंकारश्चित्तंचेतनयतेयतः॥ सत्वाख्यमंतः
करणंगुणभेदात्त्रिधामतं॥२०॥ सत्वंरजस्तमइति
गुणाःसत्वात्तुसात्विकाः॥ आस्तिक्यशुक्लधर्मैक
रुचिप्रकृतयोमताः॥२१॥ श्रीसदाशिवायनमः

ते॥ कामःइदंमेभूयादितीच्छा॥ कुलधनविद्यामदाःआदि॰लोभादयः
निद्राप्र॰आलस्यंजडबुद्धिःप्रमादोऽज्ञानंवंचनाआद्यशब्दात्विषादादि

तामसाः ॥ २२ ॥ षष्ठभावानाह ॥ प्रसन्नेति ॥ इंद्रियप्रसादः रोगाभावः आ
लस्याभावः ॥ आदिशब्देन प्रभावलादिवैद्यकोक्तं गृह्यते ॥ अत्र यद्यपि स
त्वजत्वमेवोक्तं ननु स्वात्मजत्वं तथापि स्वस्यात्मा सामर्थ्यं स्वात्मा सत्व

रजसो राजसा भावाः काम क्रोध मद मदादयः ॥ निद्रालस्य प्रमादादिर्वंचनाद्यास्तु तामसाः ॥ २२ ॥ प्रसन्नेंद्रियता रोग्यानालस्याद्यास्तु सत्वजाः ॥ देहो मात्रात्मकस्तस्मादादत्ते तद्गुणानिमान् ॥ २३ ॥ श्रीशंकर

मिति यावत् ॥ एवं च स्वात्मसत्वशब्दयोरैकार्थ्यात् ॥ न काप्यनुपपत्तिः
एवं षड्गुणयोगयुक्तमिति व्याकृत्य पंचसु वर्तमानमित्यपरमंशं व्या

चिरव्यास्यन्नाह। देहइत्ति। मीयंत्त इत्तिमात्राः। अपचीकृतपंचमहा
भूतानि। आत्मास्वरूपंउपादानंयस्यसः। यस्मादेवंतस्मात्पंचमहा
भूत्तगुणान्देहआदत्ते।२३। २४। आकाशात्तत्स्वीकृत्तगुणानाह

शब्दःश्रोत्रंमुखरतावैचित्र्यंसूक्ष्मताभ्मता धृतिः।
बलंच गगनाद्वायोःस्पर्शश्चस्पर्शनेंद्रियं।२४।
उत्क्षेपणमपक्षेपाकुंचनेगमनंतथा। प्रसार
णमितीमानिपंचकर्माणिरूक्षतां।२५।श्री०

शब्दश्रोत्रविषयोगुणःश्रोत्रं। श्रवणेंद्रियंमुखरतावाग्मित्वं। वि
चित्रकार्यकरणसामर्थ्यंसूक्ष्मेक्षित्वंस्वनिष्ठसामर्थ्यंचशब्दात्ना

डीघ्छिद्राणि इत्येतान् धर्मान् ॥ आकाशाद्देह आदत्ते ॥ एवमुत्तरत्रापि ज्ञे
यं ॥ स्पर्शः विषयः स्पर्शनेंद्रियं त्वगिंद्रियं ॥ उत्क्षेपणं ऊर्ध्वक्षेपणं अधः
क्षेपः आकुंचनं प्रसिद्धं इमानि कर्माणि वायोः सकाशादादत्ते ॥२५॥ २६॥

प्राणापानौ तथा व्यानसमानोदानसंज्ञकान्
नागं कूर्मं च कृकलं देवदत्तं धनंजयं ॥२६॥ दशेति
वायुविकृतिस्तथागृह्णाति लाघवं ॥ तेषां मुख्य
तरः प्राणो नाभेः कंठादधस्थितः ॥२७॥ श्रीहरः

लाघवं शारीरजाड्यविरोधी धर्मः ॥ इदानीं प्राणादीनां संचारस्था
नानि कार्याणि चाह ॥२७॥ आदिशब्देन भुक्तमाजीर्णादि ॥ अपिशा

ह्वनजीवनस्थैर्यमुच्यते ॥२८॥ गुदेमुख्यतःमेंढ्रादिष्वपिसञ्चरति ॥ अपिनाप्राचुर्या ॥ भिप्रायेण ॥ आदिशब्दात्तत आदिगृह्यते ॥२९॥

चलत्यसौनासिकयोर्नाभौहृदयपंकजे ॥ श
ब्दोच्चारणनिश्वासोछ्वासादेरपिकारणं ॥२८॥
अपानस्तुगुदेमेंढ्रेकटिजंघोदरेष्वपि ॥ नाभिकं
ठेवृषणयोरुरौजानुनितिष्ठति ॥२९॥ श्रीसांब

व्यानोक्षिश्रोत्रेति ॥ जिह्वाघ्राणेषु ॥ जिह्वायांघ्राणरंध्रयोश्चेति बहुव
चनं ॥३०॥ प्राणायामस्य प्राणनियमनस्यधृतिःस्थापनंकुंभकेनानिः

सारणं रेचकेन पूरणं पूरकेणेत्यर्थः॥ आदिशब्देन संकोचतताप्रसारण
दिकं गृह्यते॥ चाभिन्नक्रमः॥ समानकर्माह॥ जाठराग्निनासह॥ य

तस्य मुत्रपुरीषादिविसर्गः कर्मकीर्त्तितं॥ व्यानो
क्षिश्रोत्रगुल्फेषु जिह्वाघ्राणेषु तिष्टति॥ ३०॥ प्रा
णायामधृतित्यागग्रहणाद्यस्य कर्म च॥ समा
नो व्याप्य निखिलं शरीरं वह्निना सह॥ ३१॥ श्री०

द्यपि अनेकलक्षणनाडीषु प्राणसंचारोस्ति तथापि भुक्तपीतान्नपा
नरसानयनमार्गनयाद्द्विसप्तत्तिसहस्त्रसंख्याकथनं॥ संचरन्नेव

भुक्तस्योदनादेः रसान् सारभूतान् परिणामविशेषान् तत्तत्स्वरूप योग्यतानुसारेण प्रापयन् देहपुष्टिकृत् भवतीत्यर्थः ॥ ३२ ॥ उदानक

हि सप्ततिसहस्रेषु नाडीरंध्रेषु संचरन् ॥ भुक्तपीत रसं सम्यक् आनयन् देहपुष्टिकृत् ॥ ३२ ॥ उदानः पादयोरास्ते हस्तयोरंगसंधिषु ॥ कर्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्तितं ॥ ३३ ॥ श्री उमारमण

मंहि ॥ अंगसंधिषु संचरति ॥ देहोन्नयनं ॥ ऊर्ध्वनयनं यावत्स्थानं उत्क्रमणं च ॥ आदिशब्देन क्षुतादिकं ॥ ३ ॥ नागादीनां स्थानानि कर्माणि चाह

शिवगी० ॥ १३६ ॥

त्वगादीन् ॥ त्वगसृन्मांसमेदोस्थ्येयोदिरूपान् सप्तधातूनाश्रित्य संचरंतः स्थिताः नागकर्माह ॥ उद्गारः ॥ आदि० हेहिक्कादिकूर्मस्य कर्माह ॥ निमेषादि० उन्मेषादिकृकरस्य कर्माह ॥ क्षुत्पिपासादि

त्वगादि दिधातूनाश्रित्य पंच नागादयः स्थिताः
उद्गारादिनिमेषादिक्षुत्पिपासादिकं क्रमात् ॥ ३४ ॥
तंद्रीप्रभृति शोकादि कर्म तेषां प्रकीर्तितं ॥ अग्नेः
स्फुरोचकं रूपं दीप्तं पाकं प्रकाशतां ॥ ३५ ॥ श्री०

तदिरुद्धं क्रियादिकं देवदत्तकर्माह ॥ तंद्रीति आलस्यं प्रभृति ॥ अना लस्यादिकं च गृह्यते ॥ धनंजयकर्माह शोकः आदिश० मोह कर्णघो ॥ १३६ ॥

अ० ९

दिकं गृह्यते इति ॥ ३४ ॥ इदानीमग्नेः सकाशात् । ग्राह्यान् । धर्मानाह
रोचयति । अवलोकयति । घटादिकमिति रोचकं चक्षुरिंद्रियं । रूपं
गौरादि तद्विषयं । दीप्तं दीप्तिं पाकं पचनं । प्रकाशतां । भास्वरत्वं । अ

अमर्षतीक्ष्णसूक्ष्माणामोजस्तेजश्च शूरतां ॥ मे
धावितां तथा दत्तेजस्मात्तु रसनं रसं ॥ ३५ ॥ श्री०

मर्षां तीक्ष्णसूक्ष्माणां तीक्ष्णत्वसूक्ष्मत्वानां दोषेषु षष्ठी । अज्ञेदं भोजे
श्चारणयोरिति । चात् । ब्रह्मवर्चसादि । मेधावितां शीघ्रग्रहणसाम
र्थ्यं । इत्यग्नेः ॥ ३५ ॥ अद्भ्यः ग्रहणधर्मानाह । जलात्विति रसनं रसेंद्रि
यं । रसं तद्विषयं स्नेहादि प्रज्ञाहर्षादिकं च । मार्दवमपि इत्यपां भूमे

र्गा ह्यधर्मानाह॥ घ्राणमिंद्रियं गंधं विषयं स्थैर्यं अचलनं गौरवं गरिमाणं ॥२६॥ इदानीं सप्तधातुमित्येतत्पदं वसास्थिशोणितमित्यादिना स्वयमेव व्याकृतं तद्विवरितुमाह॥ ॥१७॥ त्वगिति॥ त्वगिव त्वक्॥ त्वगाश्रितो रसः रसाच्छोणितमि

शौत्यं स्नेहं द्रवं स्वेदं मूत्रादि मृदुतामपि॥ भूमेर्घ्राणं चगंधं च स्थैर्यं धैर्यं च गौरवं॥२७॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः॥ अन्नं पुंसाशितं त्रेधा जायते जठराग्निना॥२८॥ श्रीगौरिशंकर नमः

ति श्रुतेः शारीरकेपि॥ रसाद्रक्तं ततो मांसं इत्युक्तत्वात् तथाच रसादि सप्तधानवशरीरं दधतीति धातवः इदं च सर्वश्रुतिसंमतं॥ इदानीं चातुर्विधा

हारमयंशरीरमित्येतत्त्रयंवयितुंखाद्यपेयचोष्यलेह्यात्मकचतुर्विधाहा
रस्यशरीरारंभकभागंविविच्यदर्शयन्ति॥ अन्नमिति॥३८॥पुंसाभक्षित
मन्नंपार्थिवंवस्तुजठराग्निनापच्यमानं॥त्रेधाजायतेस्थविष्ठमध्यमक

मलःस्थविष्ठोभागःस्यान्मध्यमोमांसतांव्रजेत्॥
मनःकनिष्ठोभागःस्यात्तस्मादन्नमयंमनः॥३९॥

निष्ठभेदात्॥तस्मादन्नेनपोष्यमाणत्वान्मनोन्नमयं॥अपंचीकृतभूतकार्य
त्वान्मनसइतिभावः॥एवमुत्तरत्रापि॥३९॥ कनिष्ठावाकअणिम्नोभागः
तेजोमयिवाक॥ननुतेजोबन्नात्मकेधातुत्रयमेवोत्पन्नंस्यान्नतुसप्तधा
तवइत्याशंक्यरसाच्छोणितंतच्छोणितान्मांसंमांसान्मेदोमेदसोस्थीनिअ

स्थिभ्यामज्ज्ञामज्जयाः शुक्रमिति शोणितादिक्रमोत्पत्तिप्रतिपादिकां श्रुतिं संगृण्हाति ॥ लोहितादिति ॥ अत्र च रसरूपस्य प्रथमधातोरनियतत्वात्साधारणत्वाच्च तस्य शोणितस्य शोणितहेतुत्वं सिद्धवत्कृत्य ॥ लोहि

अपांस्थविष्ठोमूत्रं स्यान्मध्यमोरुधिरं भवेत् ॥
कनिष्ठभागः प्राणः स्यात्तस्मात्प्राणोजलात्मकः ॥ ४०
तेजसोस्थिस्थविष्ठः स्यान्मज्जामध्यमसंभवाः
कनिष्ठावाग्यतस्तस्मात्तेजोबन्नात्मकंजगत् ॥ ४१

तादित्येवोक्तं ॥ तथा च रसोजठराग्निनापच्यमानोरक्तनामापद्यते ॥ एवमुत्तरोत्तरंज्ञेयं ॥ ४२ ॥ श्रीरामचंद्राय अयोध्याप्रभुयदूर्घटनिवारणायनमः

नाडीनामपिधातुमध्येउत्पत्तिमाह॥ नाड्योपीति॥ त्रिमलमित्येतत्प्रका
रांतरेणोपपादयंति॥ वातेति॥ वातपित्तकफानांदोषत्वान्मलत्वमिति॥ ए
वंचत्रिमलंचतुर्विधाहारमयंमित्येतयोरुभयोरपि॥ तंत्रेणोपपादनं ४२

लोहिताज्जायतेमांसंमेदोमांससमुद्भवं॥ मे
दसोस्थीनिजायंतेमज्जात्वस्थिसमुद्भवा॥ ४२॥
नाड्योपिमांससंघातात्शुक्रंमज्जासमुद्भवं॥
वातपित्तकफास्तत्रधातवःपरिकीर्तिताः॥ ४३॥

वैराग्यहेतुत्वेनदेहेविद्यमानजलधातुमलानांमानसंख्यादिनिरूपणेन
हेयतामुपपादयति॥ दशांजलिति॥ दशआंजलयःपरिमाणंयस्यतत्तथो

क्तं इस्फुरत्राषिज्ञेयं ॥४४॥४५॥४६॥ श्रीउमारमणायकैलासपतियनमः

दशांजलिजलंज्ञेयं रसस्यांजलयो नव ॥ रक्तस्या
ष्टौ पुरीषस्य सप्त स्युः श्लेष्मणश्च षट् ॥४४॥ पि
त्तस्य पंच चत्वारि मूत्रस्यांजलयस्त्रयः ॥ वसा
या मेदसो द्वौ तु मज्जा त्वंजलिसंमिता ॥४५॥ अ
र्धंजलिनतःशुक्रं तेदेव बलमुच्यते ॥ अस्थ्नां श
रीरसंख्यास्याः षष्टियुक्तं शतत्रयं ॥४६॥ श्रीहर

श्रीगौरीपतिनागभूषणायसर्वजगपालनायनमोनमः ॥ श्रीरामचंद्रानमः

जल्लकानीति ॥ पायुपार्श्वपृष्ठेष्वस्थीनि जल्लकसंज्ञानि । जानुनितंबांसगंडताल्वुवंक्षणशंखशिरस्सु कपालसंज्ञकानि । दंतास्तु रुचकसंज्ञकाः । घ्राणकर्णग्रीवाक्षिकोशेषु तरुणसंज्ञानि । शेषाणि नवकसंज्ञकानि । इति पंचधा

जल्लकानि कपालानि रुचकास्तरुणानि च । नवकानीति तान्याहुः पंचधास्थीनि सूरयः ॥ ४७ ॥ द्विवाने त्वस्थिसंधीनां स्यातां तात्र दशोत्तरे । रौरवाः प्रसरास्तु कंडसेचकाः स्युरुदूखलाः ॥ ४८ ॥ श्री॰

स्थीनि सूरयः योगशास्त्राभिज्ञा आहुः ॥ ४७ ॥ षष्ठ्यादिकशात त्रयसंख्याकास्थिमेवायम वांतरविभाग इति ज्ञेयं ॥ अस्थिसंधीनां दशाधिकं शतद्वयं । तथा चैवे

य

येके शाखास्त्वष्टौ च षष्ठिश्चैकोन षष्ठिश्च मध्यजाः ॥ ऊर्ध्वं अशीतिः संधि नांदशोत्तर शातद्वयमिति ॥ तासामेवांतर संज्ञाः रौरवाद्या इति ॥ अत्र यद्यपि

समुद्गामंडलाः शंखावर्तावायसतुंडकाः ॥ इत्य
ष्टधा समुद्दिष्टाः शरीरेष्वस्थिसंधयः ॥ ४९ ॥ सार्ध
कोटित्रयं रोम्णां श्मश्रुकेशास्त्रिलक्षकाः ॥ देहस्य
रूपमेवं ते प्रोक्तं दशरथात्मज ॥ ५० ॥ श्री सांबप्रा

षष्ट्यधिकशातत्रयमस्थ्नां ॥ तथापि नखादीनामस्थित्वेपि संध्यभावादे
वमुक्तं ॥ ४९ ॥ श्मश्रूणि केशाश्च त्रिलक्षकाः ॥ ५० ॥ श्री रामचंद्राय नमः ॥

देहेस्मिन्निति ॥ अस्मिन्निति जुगुप्सिते देहे सांप्रतमिदानिमपि ॥ अभिमानेन अहं मनुष्यो ब्राह्मण इत्यादि देहात्मभ्रमेण महोपायबुद्धयः पापेनाहंकारेण न क्रियंते हंतेति खेदे ॥ एवमहंकाराद्यस्पृष्टसच्चिदानंदाद्वयपरम

यस्मादसारो नास्त्येव पदार्थो भुवनत्रये ॥ देहेस्मि
न्नभिमानेन महोपायबुद्धयः ॥ अहंकारेण पापेन
क्रियंते हंत सांप्रतं ॥ तस्मादेतत्स्वरूपं तु बोद्धव्यं तु मुमुक्षुभिः ॥ ५२ ॥

शिवमात्मस्वरूपं देहादियोनिष्कम्यज्ञातव्यमिति सूचितं ॥ तदेव स्वरूपं परमकारुणिकत्वादुपदेष्टुकाम आह ॥ तस्मादिति ॥ यस्मात्कारणात्तु देहेऽभिमानादनर्थस्तस्मादेतत्स्वरूपं तु देहविलक्षणं तु शब्दो भेदवचनः ॥ अपरो

वधारणे मुमुक्षुभिर्बोद्धव्यमेव ॥ ५२ ॥ इतिश्रीशिवगीतासुपनिषत्सुब्रह्मवि

इतिश्रीपद्मपुराणेशिवगीतासुपनिषत्सुब्र
ह्मविद्यायांयोगशास्त्रेशिवराघवसंवादेदेहस्व
रूपनिरूपणन्नामनवमोध्यायः ॥ ९ ॥ ७ ॥ ७ ॥

द्यायांयोगशास्त्रेश्रीशिवराघवसंवादे अय्याजीदिक्षितविरचितायां
तात्पर्यदीपिकायांटीकायांनवमोध्यायः ॥ ९ ॥ ७ ॥ श्रीरामसमर्थः ॥ ॥

अत्र वा शब्दोनुक्त समुच्चयार्थः वा शब्द प्रकार प्रश्ने च गंतव्यः ॥१॥ अत्र वा शब्दो
नुक्त समुच्चयः कुतो यान्ति कुत्र वा कस्मिन्मार्गे ॥२॥ हि शब्दो हेत्व वालाकैरपि व्या

राम उवाच ॥ भगवन् कुत्र जीवो सोऽजंतोर्देहे वर्ति
ष्टति ॥ जायते वा कुतो जीवः स्वरूपं चास्य किं वद ॥१॥
देहांते वा कुतो यान्ति गत्वा वा कुत्र तिष्टति ॥ कथमा
यान्ति वा देहं पुनर्नायान्ति वा वद ॥२॥ श्रीभगवानुवा
च ॥ साधु पृष्टं महाभाग गुह्याद्गुह्यतमं हि यत् ॥ दे
वैरपि सुदुर्ज्ञेयमिंद्राद्यैर्वा महर्षिभिः ॥३॥ श्रीहर

मोहं द्योतयन्ति ॥ देवैरपि अपि नाम मनुष्यादयो गृह्यंते महर्षिभिः वसिष्ठाद्यैः ॥३॥

त्वद्भक्त्या अन्यस्य त्वादृश भक्त्या भावात्॥ अवहितः उत्तरस्याति दुर्ज्ञेयत्वां त्प्रश्नक्रममतिक्रम्यापि उत्तरस्य वक्ष्यमाणत्वात् सावधानः॥४॥ श्रीशंकर

अन्यस्मै नैव वक्तव्यं मयापि रघुनंदन। त्वद्भक्त्याहं परं प्रीतो वक्ष्याम्यवहितः शृणु॥४॥ श्रीशंकर

क्रममुल्लंघ्य स्वरूप प्रश्नस्योत्तरमाह सत्येति॥ सत्यं ज्ञानात्मका अबाधित ज्ञानस्वरूपः सत्यं ज्ञानमनंतं। ब्रह्मेत्यादिश्रुतेः अनंतः अंतरहितः परमानंद विग्रह इति पाठः परश्चावासानंदश्च स एव स्वरूपं यस्य। स यश्चायं पुरुषे

यश्चासावादित्येस एकः॥ इत्यादिश्रुतेः परमात्माप्राणादिक्यः परमः उत्कृष्टः
आत्मास्वरूपंयस्यपरंज्योतिः आत्मैवास्यज्योतिरितिश्रुतेः तत्रोत्पत्तीमा
माह॥ अव्यक्तसुषुप्ताः वंतःकरणाद्यव्यक्तः॥ तत्रसर्वेषांकारणात्मनाव

सत्यज्ञानात्मकोनंतः सच्चिदानंदविग्रहः॥ परमात्मा
स्वयंज्योतिरव्यक्तोव्यक्तकारणं॥५॥ श्रीउमारमण

स्थानात्॥ ननुसर्वस्यात्मावशेषत्वात्जागृत्स्वप्नाद्युनुत्पत्तिप्रसंगअइत्य
तआह॥ व्यक्तकारणंव्यंक्तस्यांतःकरणादेंकारणंजाग्रदाद्युपादानंएवं
चसत्यज्ञानानंदाभिप्लुतस्वप्रकाशंजीवस्वरूपमुक्तं॥५॥ श्रीशंकरमां॰

इदानींस्वस्यानौपाधिकंस्वरूपमाह॥ नित्यइति॥ नित्यःकालतःपरिछेद
शून्यःसर्वात्मासर्वशुद्धेर्हेतुत्वात् अनेनवस्तुपरिछेदशून्यःस्वरू
पं॥ निर्लेपः॥ मायाविद्यागुणरहितः॥ असंगोह्ययंपुरुषइतिश्रुतेः अतएव

नित्योविशुद्धःसर्वात्मानिर्लेपोहंनिरंजनः॥ सर्वधर्म
विहीनश्चनग्राह्योमनसापिच॥६॥ नाहंसर्वेंद्रियग्रा
ह्यःसर्वेषांग्राहकोह्यहं॥ ज्ञाताहंसर्वलोकस्यममज्ञा
तानविद्यते॥७॥ श्रीसदाशिवायनमोनमः॥ ॥

निरंजनःनिर्दोषः॥ सर्वेति॥ औपाधिकधर्महीनः॥६॥ एवंजीवब्रह्मणो
निष्प्रपंचसत्याज्ञात्मकत्वमुपपाद्योपक्रांतमभेदमुपपादयितुमीशावा

स्यश्रुतिस्वमर्थवक्तुमनुक्रामति॥ आत्मन्येवेति॥ श्रुतिपदस्थानेमख्येवेति

दूरःसर्वविकारणां परिणामादिकस्यच॥ यतोवाचो
निवर्तन्ते अप्राप्यमनसासह॥ ८॥ आनंदंब्रह्ममांज्ञा
त्वानबिभेतिकुतश्चनय स्तु सर्वाणिभूतानिम
ख्येवेति प्रपश्यन्ति॥ ९॥ श्रीभस्मधारणायनमोनमः

तत्रनाधारत्वमात्रंअधिष्ठानत्वमपिएवकारेणाभेदोभिप्रेतः॥ ९॥

मांचेति ॥ चकारेण सर्वाधिष्ठानत्वोपादानत्वं सूचितं ॥ चः पश्यतीत्येतद
नुकर्षणार्थः ततः सर्वात्मैकत्वज्ञानान्न विजुगुप्सते अत्रोपपत्तिमाह ॥ य
त्र सर्वाणि भूतानि इति ॥ श्रुतिस्थपाठः सर्वाधिष्ठानमहमेवेति विजानतः

मां च सर्वेषु भूतेषु ततो न विजिगुप्सते ॥ यस्मिन्
सर्वाणि भूतानि आत्मैवासीद्विजानतः ॥ १० ॥ ॥

तत्र सर्वात्मके आत्मनि को वा मोहः तन्मितः शोको वा कः न कोपीत्यर्थः
॥ १० ॥ ननु सर्वेषु भूतेष्वात्मैव न दृश्यते इत्याशंक्य श्रुत्यैवोत्तरयति ए
षु सर्वेष्विति ॥ एषु आत्मा वर्तते इति शेषः ॥ तर्हि कुतो न प्रतीयेत इत्यत

आह मूढ इति ॥ अहं ममाभिमानेन मूढः संवृतः अतोन प्र॰ ननु अव्यव
हार्यत्वे श्रवणादि वै व्यर्थमित्यत आह ॥ दृश्यत इति अप्रयाश्रेष्ठया ॥ अ

कोमोहस्तत्र कः शोक एकत्वमनुपश्यतः ॥ एषु
सर्वेषु भूतेषु गूढोत्मान प्रकाशते ॥ ११ ॥ दृश्यतेत्व
ग्रयाबुध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ अनाद्यविद्य
यायुक्तस्तथाप्येकोहमव्ययः ॥ १२ ॥ श्रीरामस॰

नि दुर्बोधजीवब्रह्माभेदविषयिण्या सूक्ष्मया ॥ ११ ॥ सोपाधिकस्वरूप
माह ॥ अनादीति ॥ तथापि जीवचैतन्याभिन्नः अहमेको व्ययोपि ॥ अना

द्यविद्यासंयुक्तः सन्जगत्कारणात्मकब्रह्मस्वरूपइश्वरःसाक्षीतियः सोहंजगत्कर्त्ताभवामिनिर्विशेषःज्ञानमात्रेःअविद्याप्रतिबिंबितजीवसाक्षिणिइदंअपरोक्षभूतंजगत्त्रयंयथा॥१२॥१३॥ श्रीरामसमर्थः

अव्याकृतब्रह्मरूपोजगत्कर्ताहमीश्वरः॥ ज्ञानमात्रेयथादृश्यमिदंस्वप्नेजगत्त्रयं॥१३॥ तद्दन्मयिजगत्सर्वंदृश्यतेऽस्तिविलीयते॥ नानाविद्यासमायुक्तोजीवत्वेनवसाम्यहं॥१४॥ श्रीसदाशिवस०

मयिइश्वरेसाक्षिणिसर्वंजगत्दृश्यतेअस्तिविलीयतेयःसर्वज्ञःसर्ववित्यस्यज्ञानमयंतपइत्यादिश्रुतेरिति॥१३॥ नानाविद्यासमायुक्त

इति। नानाअंतःकरणाद्युपाधिभिन्नाविद्याःस्थूलाविद्याःताभिःप्र
तिबिंबितःतदवच्छिन्नइतियावत्जीवत्वेनवसामीतिसंबंधः॥१४॥
इदानींजीवोपाधानभूतंलिंगशरीरंप्रपचयति॥पंचेत्यादि॥१५॥श्री०

पंचकर्मेंद्रियाण्येवपंचज्ञानेंद्रियाणिच। मनो
बुद्धिरहंकारश्चित्तंचेतिचतुष्टयं॥१५॥ वायवःपंच
मिलिताःयांतिलिंगशरीरतां॥तत्राविद्यासमायु
क्तंचैतन्यंप्रतिबिंबितं॥१६॥ श्रीसदाशिवस०

तत्रलिंगशरीरेप्रतिबिंबितंचैतन्यंअज्ञानोपाधियुक्तंचैतन्यंतथाहि।
अयंज्योतिः। आत्माविवस्वान्। एकएवहिभूतात्माभूतेभूतेव्यवस्थि

तः सएषइह प्रविष्टः॥ आनखाग्रेभ्यइत्यादिश्रुतेः॥ लिंगशरीरोपाधिकक्षे
त्रज्ञः पूर्षुशेते पुरुषः इति अनाद्ययोः पुण्यपापयोः फलभूतानांजगतांलो
कानांभोक्ता प्रमाता॥ आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइतिश्रु

व्यावहारिकजीवस्तुक्षेत्रज्ञः पुरुषोपिच॥ सएवज
गतांभोक्तानाद्ययोः पुण्यपापयोः॥ १७॥ इहामुत्र
गतीतस्यजाग्रत्स्वप्नादिभोक्तृता॥ यथादर्पण
कालिम्नामलिनंदृश्यते मुखं॥ ३८॥ श्रीशंकर

तेः॥ ९७॥ इहामुत्रेति॥ तस्यजाग्रत्स्वप्नादिभोक्तृता॥ आदिशब्देनसुषुप्ति
मूर्छे॥ १७॥ नन्वसंगोह्ययंपुरुषइतिश्रुत्यादिसंगोदासीनस्यगतीस्वप्ना

दिभोक्तृतांचांतःकरणवशादेवकथमित्यतआहयथेतितद्वत्॥ अंतःकर
णपरिणामभूतैः॥ दूषयंत्यात्मानंबद्धंकुर्वंतीतिदोषाःकर्तृत्वभोक्तृत्वा
दयस्तैः॥ आत्मापिदृश्यतेकर्तृत्वभोक्तृत्वादिदोषवान् दृश्यते॥ ३८॥ श्री०

तद्वदंतःकरणगैर्दोषैरात्मापिदृश्यते॥ परस्पराध्या
सवशात्स्यादंतःकरणात्मनोः॥ ३९॥ श्रीउमारमणं

नन्वेवंसतिआत्मनःकर्तृत्वंकस्यपरिणामः॥ आत्मनःपरिणामायोगा
त्॥ नमायया अतिदूरत्वात्॥ नाप्यंतःकरणस्य तस्यैकदापरिणामायो
गात्॥ इत्याशंक्यपरस्पराध्यासवशादेवंप्रतीतिर्नवस्तुतइत्याहपर
स्पराध्यासवशादिति॥ ऐक्याध्यासाभिमानेन एकतापत्त्या अथवाद्वःं

खादिस्तादात्म्याध्यासेन परात्मादुःखभागिवदृश्यते ॥ १९ ॥ एवंचवस्तुतो
ऽसंगत्वमुपपादयन्ति ॥ मरुभूमाविति ॥ तद्वदात्मापिनिर्लेपः अकर्तृभोक्तृ
संगादिस्वरूपोपि मूढचेतसां ॥ स्वस्याविद्यास्वाविद्यात्मकोयआत्मसंबं ॥

एकीभावाभिमानेन परात्मादुःखभागिव ॥ मरुभू
मौजलत्वेन मध्यान्हार्कमरीचिकाः ॥ २० ॥ दृश्यंते मू
ढचित्तस्यनत्वार्द्रास्तापकारकाः ॥ तद्वदात्मापिनि
र्लेपोदृश्यते मूढचेतसां ॥ २१ ॥ श्रीसदाशिव स०

धीदोषःस्वाविद्यात्मान्वासौआत्मदोषश्च तेनमूढचेतसांविशेषानव
बोधेनयाथात्म्यज्ञानशून्यानांदृश्यतेनह्यत्तावताआत्माकर्तृत्वादिध

र्मवान्भवति॥ तद्वत्॥ मरुमरीचिकावत्कल्पितधर्मेणनस्वभावस्त्विति
त्तिभावः॥२१॥ एवमित्यतासंबंधेनजीवसाक्षिणोरंतःकरणोपाधिना
कर्तृत्वादिकमुक्तमिदानीं तस्यैवहृदयंकमलदहराकाशेनाडीभ्यः

स्वाविद्यात्मात्मदोषेणकर्तृत्वादिकधर्मवान्॥ तत्र
चान्नमयेपिंडेहृदिजीवोवर्त्तितिष्ठति॥२२॥ श्रीसांब

एवजाग्रत्स्वप्नसुषुप्तीःक्रमेणनिरूपयति॥ अन्नमयेमांसपिंडेतत्रयद्धृ
दयंतत्रजीवः॥२२॥ आनखेति॥ सएषइहप्रविष्टआनखाग्रेभ्यइतिस
एषांतर्हृदयआकाशस्तस्मिंश्छेतेइत्यादिश्रुतिःपुरीदिसंनिधानेनहृदेष्ठ॥
न

न

नमिहोच्यन्तेइत्तिवार्तिकोक्तेहृद्वेष्टनं पुरीतच्छब्दार्थः॥ योमांसपिंडउक्तः सपुरीतदभिधानेनप्रसिद्धोभवति॥२३॥ तस्यस्थाननिर्देशेनप्रसिद्धिमाह

आनखाग्रंव्याप्यदेहेनद्धुवेवहितःशृणु॥ पुरीतदभिधानेनमांसपिंडोविराजते॥२३॥ नाभेरूर्ध्वमधःकंठाद्याप्यतिष्ठतियःसदा॥ तस्यमध्येस्तिहृदयंसनालंपद्मकोशवत्॥२४॥ श्रीरामसमर्थः

नाभेरूर्ध्वमिति॥२४॥ सूक्ष्मंसु॥षिरमुत्तमं सूक्ष्मोत्तमसुषिरत्वादेः परमात्मैवोच्यते॥ जीवोहिलिंगोपाधिकः॥ यद्यपिवालाग्रस्यशतधाकरणं

कू

॥२९॥ विष्वग्विवनिर्गताइत्येताह्विशादयन्ति ॥ अदृष्टवासनादिरूपं फलं
भूक्तये ॥ ३० ॥ अवशिष्टमुख्यनाड्याः ॥ प्रयोजनादिकमाह ॥ अनंतेति

हृदयायतनस्तनिष्क्रांतायथाकर्द्धिस्मयस्तथा ॥ एको
नरशतंतासुमुख्याविष्वग्विनिर्गताः ॥ २९ ॥ प्रतींद्रि
यदशादशानिर्गताविषयोन्मुखाः ॥ नाड्यःकर्मादि
हेतुत्थाःस्वभ्रमादिफलभुक्तये ॥ ३० ॥ श्रीसदाशिव

हृग

अनंतानंतफलत्वात् ॥ ३१ ॥ तयागछन् ॥ उपासकः ॥ ब्रह्मलोकादि
षु ॥ दृढंवैराग्यंसंपाद्यक्रमेणमुच्यन्ते ॥ तयोर्ध्वमायन्नमृतत्वमेतिति

श्रुतेः तयेति सुषुम्नया उपहितं॥ अवच्छिन्नं॥ तत्रोपहितमितिवापाठः॥ तत्र सुषुम्नायां॥ विदुर्बुधाइति सुषुम्नांतर्गतलिंगोपाध्यभावेजी

वहंत्यंभोयथानद्यो नाड्यः कर्मफलंतथा॥ अनंतैकोर्ध्वगानाडी मूर्द्धपर्यंतमोजसा॥३१॥ सुषुम्नेतिसमादिष्टा तयाछिन्नं विमुच्यते॥ तयोपचितंचैतन्यंजीवात्मानं विदुर्बुधाः॥३२॥ श्रीसदाशिवस०

ग

वत्वव्यवहाराभावादिति भावः॥३२॥ यथेति॥ अपिशाह्वस्याभिन्नक्रमः चंद्रमंडले पीतिसंवध्यते॥ तेन सूर्यमंडले चेत्यर्थः॥ उनुपलभ्यमा

नोराहुर्दृश्यतेनद्वत्॥ अदृश्यमानोप्यात्मालिंगदेहे दृश्यते॥३३॥नीय
नइतिप्रतीयते॥ सर्वगतोप्यात्मालिंगदेहे विनिर्गत्ति सति गच्छतीत्य

यथाराहुरदृश्योपि दृश्यतेचंद्रमंडले॥ तद्वत्सर्व
गतोप्यात्मालिंगदेहेपि दृश्यते॥३३॥ दृश्यमानेय
थाकुंभेघटाकाशोपि दृश्यते॥तद्वत्सर्वगतोप्या
त्मालिंगदेहेपि दृश्यते॥३४॥श्रीसांबशिवसं०

पचर्यते॥लोकांतरं गच्छतिसति॥३४॥ उपचर्यते॥लोकांतरंगच्छती
ति॥नतुगच्छति॥३४॥सुखावबोधार्थप्रसिद्धं॥जाग्रदवस्थांपूर्वसुप

पादयति॥ जाग्रत्कालेतिज्ञेयं बुद्धिसाक्षीजीर्वः॥ अभिव्यक्त० प्रकटतर त तद्विषयबुद्धिः॥२५॥ सर्वं सर्वान्विषयान्॥ आप्नोतिव्याप्नोति॥ यद्यपि॥ अत्रजाग्रदवस्थानं स्पष्टं तथापिश्रुतौ स वा एष तस्मिन बुद्धांत

नीयमाने घटे यद्वत् घटाकाशोपिनीयते॥ तद्वत्स र्वगतो ह्यात्मालिंगदेहेविनिर्गते॥२४॥ निश्चलः परिपूर्णोपिगच्छतीत्युपचर्यते॥ जाग्रत्कालेय थाज्ञेयमभिव्यक्तविशेषधीः॥२५॥ श्रीशंकरः

इतिजाग्रदवस्थाया॥ अभ्युपपादनादितिनदोषाः॥ ननुसर्वास्ववस्थासु जीवसाक्षिणएकरूपत्वात्॥ जाग्रत्वेवविशेषप्रकाशाभिव्यक्तिःकथमि

॥२५॥

मशक्यं तथापिमनसोत्प्रेक्षितुं शक्यत इति कल्पितस्येत्युक्तं॥ ततश्चजी
वोतिसूक्ष्मो। दुर्विज्ञय इति भावः सच सोपि आनंत्याय परमात्मतादात्म्या
यसमर्थोभवति॥२६॥ हितानाम नाड्योद्वासप्तति सहस्त्राणिहृदयाः॥

अधोमुखंचतत्रास्तिसूक्ष्मंसुषिरमुत्तमं॥ दहरा
काशमित्युक्तं तत्रजीवोवतिष्ठति॥२५॥ बालाग्र
शतभागस्यशतधाकल्पितस्यच॥ भागोजीवःस
विज्ञेयःसचानंत्यायकल्पते॥२६॥ श्रीशिवस०

पुरीतदभिधानमभिप्रतितिष्ठंतइतिश्रुत्यर्थं विशदयन्॥ सप्रपंचंनाडी
र्निरूपयति॥ आत्मनःस्वप्नादि निमित्तसुखदुःखभोगार्थंनाड्यःस्वीका

शु।

र्याः॥ कदंबकुसुमेति अस्मिन्शरीरंशरीरकं॥२७॥ हृदयाग्रतइतिहृदयाग्रतः॥ निष्क्रांतायास्तास्त॥ एकोत्तरशतंनाड्योमुख्याः॥ विष्वक्विनिर्गताःयास्तयोगवित्तमेः॥ द्वासप्ततिसहस्रैःसंख्याताः॥ अत्रदृष्टांतोयथा

कदंबकुसुमोद्भूतकेसराइवसर्वतः॥ प्रसृताहृदयान्नाड्योयाभिर्व्याप्तिंशरीरकं॥२७॥ हितंबलंप्रयच्छंतियस्मात्तेनहिताःस्मृताः॥ द्विसप्ततिसहस्रैस्ताःसंख्यातायोगवित्तमेः॥२८॥ श्रीसदासिव०

अंर्करश्मयस्तथेतियोजना॥ शतंचैकाचहृदयस्यनाड्यस्तासांमूर्धानमभिनिःसृतेनाडीसहस्राणि॥ आसुव्यानश्चरतीतिप्रश्नोपनिषत्

त्यावांक्यनाडूय्युपपादयत्ति॥ लिंगदहेसमुद्भवाइति। वृतयःचक्षुरा
दिइंद्रियजन्यवृत्तयः नाडीद्वारायांतिबहिरितिशेषः॥२६॥ ततर्क्

निष्क्रियःसर्वमाप्नोत्ति भानुर्दशादिशोयथा॥ ना
डीभिर्वृत्तयोयांतिलिंगदेहसमुद्भवाः॥२६॥ तत्त
त्कर्मानुसारेणजाग्रद्भोगोपलब्धये॥ इदंलिंग
शरीराख्यमामोक्षान्नविनश्यति॥२७॥ श्री॥

र्मानुसारेण। ननुपूर्वयत्सुषुप्तौलिंगशरीरस्यपरस्मिन्लीनत्वाज्ज
ग्नतिपुनः कथंतद्वृत्तिसंभवइत्यतआह॥ इदमिति॥२७॥श्रीरां॰

आत्मज्ञाने।नेति साविद्ये मूलाविद्यासहित्ते सशरीरके स्वकार्यसहित्ते अंतःकरणे नष्टे सति॥ आत्मस्वरूपावस्थानं मुक्तिः॥३८॥ देहाद्याश्रय

आत्मज्ञानेन नष्टेस्मिन् साविद्ये सशरीरके॥
आत्मस्वरूपावस्थानं मुक्तिरित्यभिधीयते॥३८॥
उत्पादिते घटे यद्वत् घटाकाशत्वमृच्छति॥ घटेन
ष्टे यथाकाशः स्वरूपेणावतिष्ठति॥३९॥ श्रीहर॥

लक्षणां देहः आदिर्यस्य कारणसंघातस्य कार्यकारणसंघातस्येति
यावत्॥ स एवाश्रयो निमित्तं यस्याः या देहाद्याश्रया सैव लक्षणं स्व

रूपं यस्यास्तां प्रबुद्धां तः॥ करणवृत्यादिव्यवहारावस्थां बोधावस्थां
वा धावस्थां तिरोधायाय आसाद्य स्वत्र स्वप्नावस्थायां कर्मोद्भासितसंस्का

जाग्रत्कर्मक्षयवशात्स्वप्नभोगउपस्थिते॥ बोधाव
स्थां तिरोधाय देहाद्याश्रयलक्षणां॥४०॥ कर्मोद्भा
सितसंस्कारस्तत्र स्वप्नरिरंसया॥ अवस्थां च प्र
यात्यन्यां मायावीवात्ममायया॥४१॥ श्रीसदाशि०

रः॥ शुभाशुभकर्मभिः॥ उद्भासितः प्रकटीकृतः॥ संस्कारो यस्य सः
एतादृशः सन् स्वप्नरिरंसया स्वप्ने क्रीडेच्छया अन्यां स्वप्नावस्थां प्रया
ति॥ यथा कश्चिन्मायावी नटो ...ः अवस्थां देहान्तरं यातितद्वत्॥४१॥

दि

अत्र स्वप्नेंतकरणादीनांवासनात्संस्थापनात्तादात्म्येनाध्यासनात्॥
वासनात्मत्तावासनामात्रतायेनैवंते प्रकारेण तत्र स्वप्ने परात्मनः

घटादिविषयान्सर्वान्बुध्यादिकरणानिच॥भू
तानिकर्मवशातोवासनामात्रसंस्थितान्॥४२॥ए
तान्पश्यन्स्वयंज्योतिःसाक्षात्माव्यवतिष्ठते॥
अत्रांतःकरणादीनांवासनाद्वासनात्मता॥४३॥

स्वात्माभिन्नजीवन्वे तन्यस्यवासनामात्रसाक्षित्वंनत्वन्यथाअप
वीक्षत्वानुपपत्तेरित्यर्थः॥४३॥ ननुस्वप्नेकार्यकारणसंघातस्या

नुपयोगेतद्ध्यासोः अनुपयुक्तकर्तृकर्मक्रियात्मकः॥ एवेत्यत्तआ
हवासनाभिरित्ति॥ अत्रस्वमेकर्मचोदितः॥ कर्माधीनः॥ जाग्रत्का

वासनामात्रसाक्षित्वं तेन तत्र परात्मनः॥ वासना
भिः प्रपंचोत्र दृश्यत्ते कर्मचोदितः॥ ४४॥ जाग्रत्का
लेयथा तद्वत्कर्तृकर्मक्रियात्मकः॥ निःशेषबुद्धि
साक्षात्मा स्वयमेव प्रकाशत्ते॥ ४५॥ श्रीशंकर॥

लेयथात्तद्वत्कर्तृकर्मक्रियात्मकः॥ कर्ताअंतःकरणंकर्मभोग्यंविष
यः॥ क्रियाकरणसाध्याताः आत्मास्वरूपंयस्यसः निःशेषबुद्धिसाक्षा

त्मा स्वयमेव प्रकाशते ॥४५॥ वासनामात्रेति ॥ मात्रशब्दः कृत्स्नवाची तथा
च यावद्वासनासाक्षित्वं उच्यते तावत्साक्षिणः स्वाप उच्यते ॥ स्वेन भा
सा स्वज्योतिषा स्वपितीति श्रुतेः ॥ अत एव वार्त्तिके ॥ निःशेषलोकधी

वासनामात्रसाक्षित्वं साक्षिणः स्वाप उच्यते ॥ भूत

जन्मनियद्भूतं कर्म तद्वासनावशात् ॥४६॥ श्रीशि०

वृत्तिसाक्षिणेवाविकारिणः ॥ प्रतीच ईदृशी वृत्तिः ॥ स्वपीतीत्यभिधी
यत इति ॥ अनेन प्रातीचः स्वप्रकाशत्वं सुबोधमिति भावः ॥४६॥ ॥

ननुसद्योजातेनबालेननकिंचिदनुभूतंयेनस्वप्नेनत्पश्येदत्तआह ।भूत
जन्मनीति ।नेदीयस्त्वात्करणानांआद्येवयसिबाल्ये प्रायाग्नहहेणंके

नेदीयस्त्वाद्दयस्याद्येस्वप्नंप्रायःप्रपश्यति । मध्येव
यसिकार्केस्यात्करणानामिहार्जिता ॥४७॥ प्रायेण,वी
क्षतेस्वप्नवासनाःकर्मणोवशात् । इयियासुःपरलो
कंतुकर्मविद्यादिसंभृतं ॥४८॥ श्रीसांबसदाशि ॥

दाचित्कार्थं ॥४७॥ वार्द्धकेस्वप्नमाह ।इयासुरिति । परलोकंतुपूर्ववैल
क्षण्यार्थः ।पूर्वकर्मविद्यादिसंभृतंसंपादितं ॥४८॥ श्रीशिवायनमः

यत्प्रपतनात् भ्रमणात् श्येनः॥ गगनमंडले श्रांतःसन्॥४९॥नीः
इतिपाठः॥नय्यस्ति भ्रमणश्रममितिनीःसःश्येनः॥ निलयनाय श्रम
नाशाय यततोः॥ एवंजाग्रत्स्वप्नभूमौश्रांतःआत्मामनः॥ आपीतंकर

भाविनोजन्मनोरूपं स्वप्नआत्माप्रपद्यति॥ यद्वत्प्र
पतनाच्छेनःश्रांतोगगनमंडले॥४९॥ आकुंच्यपक्षौ
यनत्तेनीडिनिलयनायसः॥ एवंजाग्रत्स्वप्नभूमौश्रां
तआत्माभिसंचरन्॥५०॥श्रीरामसमर्थ०श्रीवि०

णग्रामः॥ आसमंतात्पीतःलीनःइंद्रियग्रामःयस्मिन्सःकरणात्म
नाकारणात्मनेश्वरेणब्रह्माख्यंनीडंप्रपद्यते॥५०॥ तावाअस्येताहि

तानामनाड्योयथाकेशाःसहस्त्रधाभिन्नास्ताश्चअणिम्नातिष्ठंतीत्क
दर्कंडिकाप्रवृत्तास्वयमपितदभिप्रायंविवृण्वन्नाह नाडीमार्गैरितिइं
द्रियाणांचक्षुरादीनांवासनाःवासनारूपंप्रपंचं॥५१॥ श्रीरामसम०

आपीतकरणग्रामःकारणेनैत्तिंचैकतां। नाडीमार्गै
रिंद्रियाणामाकृष्यादायवासनाः॥५१॥ सर्वंग्रसित्वा
कार्यंचविज्ञानात्माप्रलीयते॥ इश्वराख्येव्याकृतेथतं
थासुखमयोभवेत्॥५२॥श्रीसांबायनमोनमः॥

सर्वंग्रसित्वाकार्यंचजाग्रत्स्वप्नशरीरकंचग्रसित्वावासनारूपेणस्थि
तमादायविज्ञानात्माव्याकृते इश्वरेप्रलीयते॥ एषोस्यपरमोलोक

इत्युक्तम् श्रुतिं चित्रादयन्नाह॥ अथ तयेति॥ अथ विज्ञानात्मनः॥ प्रल
यानंतरं॥ तथा तेन प्रकारेणेश्वरवत्सुखमयः॥ भवेत् आनंदमयः

कृत्स्नप्रपंचविलयस्तथा भवति चात्मनः॥ योषितः
काम्यमानायाः संभोगांते यथा सुखं॥५३॥ स आनंद
मयो बाह्याभ्यांतरः केवलस्तथा॥ प्राज्ञात्मतां समासा
द्य विज्ञानात्मा तथैव सः॥५४॥ श्रीसदाशिव प्रसन्नः

काम्यमानायाः काम्यत इति काम्यमाना हृदयानंदकरी तस्याः॥५४॥
श्रीसांबाय गौरीपति जगत्पालनायन मोनमः॥ श्रीरामसमर्थः॥ ॥

विज्ञानात्मेत्ति। तथाकारणात्मवत् तिष्ठन् यथाधिसः अविद्यासूक्ष्मवृ
त्यासुखं यथा आनुभवति॥ ५५॥ श्रीगौरीशंकरायनमः॥ श्रीरामस०

विज्ञानात्माकारणात्मा तथातिष्ठन् तथापि सः॥ अ
विद्यासूक्ष्मवृत्यानुभवत्येव स्फुरवंयथा॥ ५५॥ अज्ञा
नमपि साक्ष्यादि वृत्तिभिरनुभूयते। तथाहं स्फुरवम
स्वाप्सं नैव किंचिद्विदं॥ ५६॥ श्रीसांबसर्पभूषणान०
क्षित

तथा साक्ष्यादि वृत्तिभिरिति बहुवचनेन जाग्रत्स्वप्नसुषुप्तीनां ग्रह
णं॥ सर्वदाऽज्ञानस्य भावात्॥ अज्ञानमपि अनुभूयते। सुखमहमस्वा

प्सं नैव किंचिद्वेषि तं ॥५७॥ उक्तार्थेऽन्यथानुपपत्तिं प्रमाणयति ॥ इत्ये
वं प्रत्यभिज्ञापि पश्चात्स्वानंदरतस्य जीवस्य न केवलमिहैव जाग्रदा
दि भेद इहामुत्र लोकयोरस्तीति ॥५८॥ कुत आगादितिश्रुतेरुत्तर

इत्येवं प्रत्यभिज्ञापि पश्चात्तस्योपजायते ॥ जाग्रत्स्व
म सुषुप्त्याख्यमेवेहामुत्रलोकयोः ॥५८॥ पश्चात्क
र्मवशादेव विस्फुलिंगा इवानलात् ॥ जायंते कारणा
देव मनोबुध्यादिकानि तु ॥५९॥ श्रीउमारमणाय॥

भूताया ॥ यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंति ॥ एवमेतस्मात्मनः सर्वे
प्राणाः ॥ इति श्रुतेस्तात्पर्यमाह ॥ पश्चादिति ॥ पश्चान्नु जायद्भोगप्रद कर्मो
द्बोधवशात् ॥ कारणादेव जीवचैतन्यादेव मन इत्यादि जायंते ॥५९॥

ननुकार्यकरणसंघातस्यलयात्॥ सुषुप्तौवासनाभिःजीवात्मनोऽभि
मानरूपसंबंधाभावात्पुनरुत्पत्तौकृतहान्यकृताभ्यागमप्रसंगइ
त्याशंक्यसव्याघ्रोवासिंहोवावृकोवेत्यादि। व्यवस्थापिकश्रुत्यपेक्षितं

पयःपूर्णोघटोयद्वन्निमग्नःसलिलाशये। तेनैवो
द्धृतआयातिविज्ञानात्मातथैत्यजात्। ६०॥ श्री०

तदनुरूपदृष्टांतमाह। पयःपूर्णोघटइति॥ आयाति। स्यस्यव्यवहा
रविषयःभवतिनतुतंदशायै॥ एवंविज्ञानात्माअजात्। कारणात्॥ त
थेति॥ ६०॥ तत्तदात्मरूपाभिमानस्यापिसंस्काररूपेणावस्थाना

त्

त् ॥ इति भावः ॥ ननु जायतीव सुषुप्तावपि देवः दत्तादयो यज्ञदत्तादिभ्यो विविक्ततया कुतो न भासंतइत्यत आह ॥ विज्ञानात्मेति ॥ कारणात्मा ईश्वरात्मकारणाभिन्नो विज्ञानात्मांतः ॥ करणोपहितस्तथा तनिष्ठन् ॥ अन्यो

विज्ञानात्मा कारणात्मा तथान्तिष्ठंस्तथापि सः ॥ दृ
श्यते सत्सु तेषेव नष्टेष्वायात्यदृश्यतां ॥ ६१ ॥ श्री०

न्याविविक्ततया वर्तमानस्तथापि सः विज्ञानात्मा तेषु अंतःकरणेषु सत्सु दृश्यते ॥ तेषु नष्टेषु ॥ अदृश्यतामायाति ॥ ६१ ॥ उक्तमर्थं दृष्टांतेन

निगमयत्ति॥ निर्विकारः॥ अर्यमा आप्यन्त्राप्युपाधिषु सत्सु तत्र दृश्यते
तद्वत्॥ कूटस्थो निर्विकारस्तथा परः पुमान्॥ परमात्माभिन्नः सवि

एकाकारोर्यमा तत्तत्कार्येष्विव परः पुमान्॥ कूटस्थो
दृश्यते तद्वद्गच्छत्यागच्छतीव सः॥ ६२॥ श्रीशंकर

ज्ञानात्मा तेषु उपाधिषु सत्सु दृश्यन्ते॥ गच्छत्सु गच्छति॥ आगच्छत्सु॥ आ
गच्छन्तिव॥ ६२॥ मोहमात्रांतरायत्वात्॥ मोहमात्रव्यवधानात्॥

तस्यजीवात्मनः सर्वसुखदुःखादि भोक्तृत्वं उपपद्यते॥ स्वभावतः देहा घतितः॥ आत्मास्वयंज्योतिः स्वप्रकाशः यः तस्येति॥ एवंजीवस्वरूपं

मोहमात्रांतरायत्वात्सर्वं तस्योपपद्यते॥ देहाद्य
तीत आत्मापि स्वयंज्योतिः स्वभावतः॥ ६३॥ एवं
जीवस्वरूपं ते प्रोक्तं दशरथात्मज॥ ६४॥ श्री०

हेदशरथात्मजेतु॥ भ्यंप्रोक्तं॥ ६४॥ इतिश्रीअय्याजीदीक्षितविर चितायांशिवगीताटीकायां तात्पर्यदीपिकायांजीवस्वरूपनिरूप

णं नाम दशमोध्याय समाप्तः ॥ १० ॥ श्री सांबसदाशिव प्रसन्नः ॥

इति श्री पद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे शिवराघवसंवादे जीवस्वरूपनि
रूपणं नाम दशमोध्यायः समाप्तः ॥ १० ॥ ७.७ ॥

श्री शंकर शूलपाणियनमः ॥॥ श्री दशरथात्मजायसीतापतियनमः ॥

येन प्रकारेण विज्ञानात्मनो जाग्रदाद्यवस्थाप्राप्तिर्यथा तेन प्रकारेणेत्यर्थः॥ देहांतरगतिं प्राप्तिं परलोकगतिं स्वर्गनरकादिसाधारणस्य प्राप्तिं तथा वक्ष्यामि॥ तथा च देहांतर॥ प्राप्तौ परलोकप्राप्तौ च साधन

श्रीभगवानुवाच॥ देहांतरगतिं तस्य परलोकगतिं तथा॥ वक्ष्यामि नृपशार्दूल मत्तः शृणु समाहितः॥१॥

गमनक्रमे प्राप्तव्यस्वरूपफलादीकं सर्वथा तत्प्रत्यये सूचितं॥ नृपशार्दूळेति श्रोत्रं तरादनिराय रुच्युत्पादनाय॥ समाहितः॥ शृणु इत्यनेन मध्ये श्रुत्यर्थः कश्चिव्द्युत्क्रमणकंचनांशं परित्यज्याधिकं कंचनांशं गृहीत्वोच्यते तत्र त्वया चित्तक्षोभं त्यज्य सम्यक् श्रोतव्यमिति॥१॥ श्रीहरः

अत्र स्थूलदेहे अन्नपानादिकं यदस्ति न स्यरसात्सारों स्थूलदेहस्य लिंगदेहस्य च आमबंधनं अपक्वंबंधनं दृढतर संश्लेषो जायते तेन जीवनं धारणं भवतीति शेषः आमबंधनमित्युक्तं तया प्रतिदिनं नूतन

भुक्तं पीतं यदस्त्यत्र तद्रसादामबंधनं ॥ स्थूलदेहस्य लिंगस्य तेन जीवनधारणं ॥ २ ॥ व्याधिना जरयावापि पीड्यते जाठरोनलः ॥ ॥ ॥

नबंधः एकदेववदाढर्यनेति जननेदृढबंधनमित्येवब्रूयादिति ॥ २ ॥ व्याधिनेति व्याधिना ज्वरादिनानियतकालेन जरया कालव्यापिन्या ॥

मानस्याव्यथमावापि धातुवैषम्याद ग्निमंदो भवति धातुवैषम्येहि श्ले ष्मणापित्तं न्यूनं वन्हिस्तु पित्तजन्यत्वात् तद्रूपत्वाद्वा मंदो भवति॥ ---
तेनाग्निमांद्यं भवति तेन भुक्तमन्नं पीतं जलादि अलं सम्यक्॥ ---

श्लेष्मणा तेन भुक्तान्नं पीतं वा न पचत्यलं ॥ ३ ॥ भुक्त पीतरसाभा --- वात्तदा शुष्यंति धातवः ॥ भुक्तपी तरसेनैव देहं लिंपंति नित्यशः ॥ ४ ॥ श्रीशंकरं नमः

न नपचति न जरयति तिलत्वादिति ॥ १ ॥ ये धातवः भुक्तपीतरसेनैव देहं नित्यशः निरंतरं लिंपंति ते धातवस्तदा भुक्तपीतरसाभावात् शुष्यंति ॥ ४ ॥

समीकरोतीति। तत्तन्नाडीरंध्रद्वाराणिनिखिलधातुशरीरेषुभक्तंपीतर
सान्समम्यगानयतिव्युत्पत्त्यासमानोरसानयनद्वारापोषकः धातुवस्तु

समीकरोतियस्तस्मात्समानोवायुरुच्यते। इदानीं
तद्रसाभावादामबंधनहानितः॥५॥ श्रीशिवशंकर

कारणत्वेनेतिनकोपिदोषः इदानींज्वरव्याध्याद्युपहितकालेतद्रसाभा
वात्। मंदाग्नितयाभुक्तंपीतं॥५॥ रसाभावात्। आमबंधनहानितःदृ
ढबंधनहानेर्हेतोःपरिपक्वरसत्वेनहेतुना। यथाम्रंफलंवृंततःस्वयमेव

यथा आशु पतति तथा लिंगं सूक्ष्मशरीरं तनोः स्थूलशरीरात् व्रजेत् गच्छे
त् ॥ ६ ॥ तथा च तद्यथाम्रं वोदुंबरं वा पिप्पलं वा बंधनात् प्रमुच्यते इत्या
दिश्रुत्यर्थ उपपादितो भवतीति ॥ ६ ॥ निष्क्रामणमुत्क्रांगमनप्रकारमा

परिपक्करसत्वेन यथाम्रं वृंततः फलं ॥ स्वयमेव पत
त्याशु तथा लिंगं तनोर्व्रजेत् ॥ ६ ॥ तत्तत्स्थानादपाकृ
ष्य हृषीकाणां च वासनाः ॥ अध्यात्मिकाधिभूतानि
हृत्पद्मे चैकतां गतः ॥ ७ ॥ ॥ ॥

ह ॥ तत्तत्स्थानादप्राकृष्येति हृषीकाणामिंद्रियाणां वासनाः तत्तत्स्थाना
त् तत्गोलकात् चक्षुराद्यधिष्ठानादयोकृष्य चकारात् विषयवासनां त्विष

यवासनाअपिअध्यात्मिकाधिभूतानिअंतराणिभाचिच्छरीरारंभक
भूतानिआदायहृत्पद्मेचवशाद्यात् निमित्तकरणाभिमाभिदेवताभिश्च
तैःसहैकतांगतःव्यूढीभूतः॥ ७॥ तत्रोर्ध्वगइतितत्रहृत्पद्मेउर्ध्वगःप्रा

तत्रोर्ध्वगःप्राणवायुःसंयुक्तोनववायुभिः॥ उर्ध्वोच्छ्वा
सीभवत्येषतथातैर्नैक्यतांगतः॥ ८॥ श्रीशंकरं

णवायुःउदानःतस्यैवउत्क्रमेणहेतुत्वात्संयुक्तःनववायुभिःनागादि
भिःउर्ध्वोच्छ्वासीभवत्येषःविज्ञानात्मायथातथा तथाप्राणवायुनासंहै
क्यंगतःअत्रतमुत्क्रांतंप्राणोत्क्रामतिप्राणमनुत्क्रामंतंसर्वेप्राणा

उत्क्रामंतीतिश्लोकक्रमादिकमभिहितं॥ ९॥ विधाकर्मसमायुक्तः
तंविद्याकर्मणीसमन्वारभंतेविषयवासनाचेति॥ १ ॥ प्रज्ञात्मेति॥
प्रज्ञात्मानंजीवात्मानं॥ समाश्रित्यविज्ञानात्माअंतःकरणंतत्प्रतिबिंबो

चक्षुषोवाथमूर्ध्नोवानाडीमार्गंसमाश्रितः॥ विद्या
कर्मसमायुक्तोवासनाभिश्चसं युतं॥ १ प्रज्ञा
त्मानंसमाश्रित्यविज्ञानात्मो पसर्पति॥ यथाकुंभो
नीयमानोदेशाद्देशांतरंप्रति॥ ११॥ श्रीरामसमर्थः

पाधिभूतः संनुपसर्पति॥ ननुपूर्णस्यासंसंगोदासीनस्यांतःकरिणो
पाधिवशाद्देहंत्यक्त्वादेहांतरंप्रतिगमनंकथंघटतेइत्यत्रदृष्टांतम

नुनयत्ति ॥ यथाकुंभोनियमानइति ॥ १० ॥ तद्वत् घटोपाध्याकाशवत्लिंग
परात्मनानुगतंसत् गछनिजीवात्मनासहयात्ति ॥ ११ ॥ एवंकरणंसंयु

खपूर्णएषसर्वत्रसआकाशोपित्तत्रतु ॥ घटाकाशग
ख्यतोयानि तद्वल्लिंगंपर[illegible]त्मना ॥ ११ ॥ पुनर्देहांतरंया
नियथाकर्मानुसारतः ॥ आमोक्षात्संचरत्येवंमत्स्यः
कूलद्वयंयथा ॥ १२ ॥ पापभोगायचेद्गछेयमदूतैरधिष्ठितः ॥

कोजीवःओमोक्षात् ॥ मोक्षमवधीकृत्ययथाकर्मानुसारतःपुनर्देहांतरं
तेयाति ॥ १२ ॥ पुण्यः[illegible]पुण्येनकर्मणाभवत्तिपापःपापेनेतिश्रुतेः ॥ यदि
पापकारीचेत्तदायमदूतैःअधिष्ठितः ॥ यातनादेहमाश्रित्यपापभोग

क्षमनरकदेहभिमानी भूत्वा नरकानेव गच्छति ॥१३॥ पुण्यः पुण्येनेत्यर्थमाह
इष्टापूर्त्तेत्यादि। एषः प्रत्यक्षकर्मानुष्ठाताऽतोऽर्चिषमभिसंभवंतीतिश्रुत्याऽर्चि
षमग्निमीत्यबर्हिषःसकाशाद्धूममेत्य धूमाद्रात्रिं ततो रात्रेः कृष्णपक्षं तस्मा

यानतो नादेहमाश्रित्य नरकानेव केवलं ॥१३॥ इष्टापूर्त्तानि
कर्माणि योनुतिष्ठन्ति सर्वदा। पितृलोकं व्रजत्येष धूममा
श्रित्य बर्हिषः ॥१४॥ धूमाद्रात्रिं गतः कृष्णपक्षं तस्माच्च द
क्षिणं ॥ अयनं च ततो लोकं पितॄणां च ततः परं ॥१५॥

कृष्णपक्षाच्च दक्षिणममयनं ततोऽयनात्। पितॄणां लोकं चेत्यनुक्तसमुच्च
यार्थे तेन पितृलोकं व्रजति ॥१४॥ पितॄणां चेत्यनुक्तसमुच्चयार्थे चकारः तेन
पितृलोकादाकाशमाकाशाच्चंद्रमसमेत्यमितिश्रुतिबलात्पितृलोकादाकाश

चंद्रलोकमिति ॥ १५ ॥ चंद्रलोके इति ॥ चंद्रलोके दिव्यदेहं तेजोमयं देहं प्रा
प्य परां उत्कृष्टां श्रियं ॥ भुंक्ते चंद्रसमानः ॥ असौ जीवः तत्र चंद्रलोके याव
त्कर्मफलं पुण्यावधि वसेत् ॥ १६ ॥

चंद्रलोके दिव्यदेहं प्राप्य भुंक्ते परां श्रियं ॥ तत्र चंद्रस
मानोऽसौ यावत्कर्मफलं वसेत् ॥ १६ ॥ ॥

कथमायाति वा देहमित्यस्योत्तरं वक्तुं ॥ अथैतमेवाध्वानं यथैतमाकाश
माकाशाद्वायुं वायुर्भूत्वा प्रचर्षतीति श्रुतिं संगृह्णाति तथैवेति तथैव प्र
कारेण भुक्त्वा वशिष्टकर्मशेषेणेति केचित् ॥ वस्तुवस्तु भुक्तकर्मणः क

र्मोत्तरं कर्मशेषः तेन यथाइतं गतं तथा तेन प्रकारेण जीवः पुनराव्रजेत्
॥ आगमनप्रकारमाह वपुरिति ॥ चंद्रलोके भोगार्थमम्मयं शरीरं त्य
क्त्वा उत्क्रांतिवत् सूक्ष्मशरीरावच्छेदमात्रेण स्थित्वा जीवत्वमासाद्या०

तथैव कर्मशेषेण यथेतं पुनराव्रजेत् ॥ वपुर्विहाय
जीवत्वमासाद्याकाशमेति सः ॥ १७ ॥ द्या

काशमेति ॥ आकाशसाम्यं प्राप्नोति न तु तद्भावं एवमुत्तरत्रापि साम्य
मेव भक्ष्य भोज्येत्तदंतं योज्यं ॥ १७ ॥ आकाशाद्वायुमागत्य वायोरनं
तरं धूमो द्रष्टव्यः ॥ अभ्रशब्देन मेघो धूमोत्पन्नं मेघपूर्वावस्थारूपं तस्मा

ष्ट्रम रूपात्तं अभ्रात् मेघं व्रजन्ति मेघाद्वृष्टिरूपो भवेद्‌सौ जीवः ॥ १८ ॥
ततो वृष्टेः सकाशात् धन्यानि भक्ष्याणि जायन्ते कर्मचोदितः शुभाशुभक

आकाशाद्वायुमागत्य वायोरभ्रं व्रजत्यथ ॥ अभ्रान्मे
घं समासाद्य तत्तो वृष्टिर्भवेदसौ ॥ १८ ॥ ततो धान्यानि
भक्ष्याणि जायंते कर्मचोदिताः ॥ योनिमन्ये प्रपद्यंते
२ शरीरत्वाय देहिनः ॥ १९ ॥ श्रीसांबसदाशिवाय नमः

र्मणा चोदितः प्रेरितः सन् भक्षितुं योग्यानि भक्ष्याणि धान्यानि व्रीहिय
वादीनि जायंते देहिनः देहाभिमानिनः जीवाः योनिं मनुष्ययोनिं शरीर

त्वायशरीरभावाय प्रपद्यंते ॥१९॥ अन्ये देहिनः यथाकर्म यथाश्रुतं यथाकर्मानुसारतः ॥ यथाशास्त्रानुसारतः तं विघाकर्मणि समन्वारभेते अतः

स्थाणुमन्ये प्रपद्यंते यथाकर्म यथाश्रुतं ॥ ततोन्नत्वं
समासाद्यपितृभ्यां भुज्यते परं ॥२०॥ ततः शुक्रं रजश्चैव
भूत्वा गर्भेभिजायते ॥ ततः कर्मानुसारेण भवेत्स्त्री
पुन्नपुंसकं ॥२१॥ श्रीसदाशिवउमापतियनमः

स्थाणुत्वं स्थावरत्वं प्रपद्यंते ततोन्नत्वं समासाद्यपितृभ्यां भुज्यते परं ॥
॥२०॥२१॥

एवंजीवगतिःइहलोकपरलोकयोःगतिःसंचरणंसंरणंइदानींवृत्ता
नुवादपूर्वकंपुनर्नायातिवावदेति प्रश्नोत्तरंवक्तुंप्रतिजानातिमुक्तित

एवंजीवगतिःप्रोक्तामुक्तिंतस्यवदामिते॥ यस्तु
शांत्यादि,युक्तःसन्सद्विद्याभिरतोभवेत्॥२२॥ ॥

स्यवदामिते॥ब्रह्मलोकगतस्य पुनःपुनरागमनाभावःसर्वथा गत्यभा
वश्चेत्यकभयविधमुक्तिंवदामि॥२२॥ यस्तुशांत्यादियुक्तःशमदमादिसं

युक्तःसन्सद्विद्याभिरतःब्रह्मविद्यारतःअध्यात्मशास्त्रानिरतइतियाव त्॥भवेत्॥सःदेवयानेनब्रह्मलोकाल्लोकावधितत्पर्यंतंयाति॥गमन

सयातिदेवयानेनब्रह्मलोकावधिंनरः॥
अर्चिर्भूत्वादिनंप्राप्यशुक्लपक्षमथोव्रजेत्॥ २३॥

प्रकारमाह॥अर्चिर्भूत्वाअर्चिरभिमानिनींदेवतांएवंदिनमित्यादाव पियोज्यंशुक्लपक्षंतदभिमानिनींदेवतांव्रजेत्॥२३॥श्रीरामसमर्थः॥

अतःपरमित्यत्याग्यावरुणेंद्र प्रजापतिलोकाःज्ञातव्याः ततल्लोके भागश्चै
यज्ञः ॥२४॥ तत्रोषित्वाचिरंकालंब्रह्मणासहेत्ति॥ ब्रह्मणासहतेसर्वेसं

उत्तरायणमासाद्य संवत्सरमथोव्रजेत्॥ आदित्य
चंद्रलोकौ तुविद्युल्लोकमतोव्रजेत्॥२४॥ अथदिव्यः
पुमान्कश्चिद्ब्रह्मलोकादिहेत्तिसः॥ दिव्येवपुषिसं
धायजीवमेनंनयत्यसौ॥२५॥ श्री गौरीपतिः॥

प्राप्तेप्रतिसंचरेपरस्यांतेकृतात्मानःप्रविशंतिपरंपदं॥ अस्याःश्रुते
रर्थः॥ तेब्रह्मलोकगताः॥ प्रतिसंचरेप्रलयेप्राप्तेसतिपरस्यांतेपरब्रह्मणः॥२५॥

आयुःशतवर्षात्मकं तस्यांते प्राकृतिकलये प्राप्ते सति ब्रह्मणा सहमु
च्यते मुक्तो भवति ॥ तस्येति ॥ न तस्य प्राणा उत्क्रामंति तत्रैव समवली

ब्रह्मलोके दिव्यदेहे भुक्त्वा भोगान्यथेप्सितान् ॥ तत्रो
षित्वा चिरंकालं ब्रह्मणा सह मुच्यते ॥ २६ ॥ शुद्धब्रह्मरतो
व यश्च सनायात्यैं कुत्रचित् ॥ तस्य प्राणा विलीयंते जले
सैंधवपिंडवत् ॥ २७ ॥ स्वप्नेस्दृष्टिर्यथा स्टृष्टा प्रबुद्धस्य
विलीयते ॥ ब्रह्मज्ञानवतस्तद्वद्विलीयंते तथैव ते ॥ २८ ॥

यंते इति श्रुतेः ॥ २७ ॥ स्वप्नसृष्टिर्यथा प्रबुद्धस्य जाग्रद्वस्थां प्राप्तवतः वि
लीयते नश्यति ॥ तथा ब्रह्मज्ञानवतः ब्रह्मनिष्ठस्य ते प्राणाः तथैव प्रबु

द्रवत् विलीयंते तेन नश्यंति ॥ २८ ॥ विद्याकर्मविहीन इति यः नरकप्रापको
दुष्टकर्मवान् तृतीयं ॥ स्थानं भूयो भूयो जननमरणात्मकं स्थानं ए
ति प्राप्नोति पश्चात्कर्मशेषेण क्षुद्रजंतुर्भवेदसौ ॥ अस्यार्थः ॥ पश्चात्त

विद्याकर्मविहीनो यस्तृतीयं स्थानमेति सः ॥ भुक्त्वा
च नरकान् घोरान् महारौरवसंज्ञकान् ॥ २९ ॥

स्यारब्धस्य यानंतरं तस्य पापस्य कर्मणः ॥ शेषेण शेषे शब्दः सारस्या
सजीवस्य पापांतरस्य ग्रहणं ॥ क्षुद्रजंतुः ॥ शरीरतो जीवनतः कर्मा
देश्च ॥ असौ नरकगं ना भवेत् ॥ २९ ॥ श्रीकेदारेश्वराय नमो नमः ॥

एवंजीवगतिः इहलोकपरलोकसंचरणलक्षणा ॥ अन्यत् जीवस्वरूप निरूपणोपयुक्तं ॥३१॥ गंधर्वादिषु लोकेषु अपि भोगआनंदानुभवः

पश्चात्प्राक्कर्मशेषेण क्षुद्रजंतुर्भवेदसौ ॥ यूकामशकदंशादिजन्मासौ लभते भुवि ॥३०॥ एवंजीवगतिः प्रोक्ता किमन्यच्छ्रोतुमर्हसि ॥ राम उवाच ॥ भगवन्यत्त्वया प्रोक्तं फलं तु ज्ञानकर्मणोः ॥ ब्रह्मलोके चंद्रलोके भुंक्ते भोगानिति प्रभो ॥३१॥ गंधर्वादिषु लोकेषु कथं भोगसमीरितः ॥ देवत्वं प्राप्नुयात्कश्चित्कश्चिदिंद्रत्वमेति च ॥३२॥

समीरितः एतदुभयं ॥ भूतौ कथं भोगः समीरितः एतदुभयं कथं संगच्छ

त्इतिप्रश्नार्थः॥३३॥एतत्भुज्यमानंदेवत्वादिकंचशास्त्रात्सूर्यलोक
भोगोपि अपित्वेत्युक्तन्यासमुच्चितयोरपिविद्याकर्मणोरपिनतत्फलंसा
धनद्वयेनमार्गद्वयविधानात्तद्व्यतिरेकेणमार्गांतरंनास्ति। पूर्वोक्तं

एतत्कर्मफलंचास्तुविद्याफलमथापिवा॥ तद्बहिगिरि
जाक्रांततत्रमेसंशयोमहान्॥३३॥श्रीभगवानुवाच॥
तद्विद्याकर्मणोरेवानुसारेणफलंभवेत्।।युवातिसुंद
रःश्रीरोनिरोगीबलवान्भवेत्॥

त्वन्यथासिद्धमितिभावःतत्रगंधर्वादिलोकभोगविषये॥३३॥तद्विद्या
कर्मणोरेवेतितत्।।देवत्वादिकंविद्याकर्मणोरेवफलंसाधनांतरस्यानु
पलब्धेःतद्विद्याकर्मणोःफलंभवेदेवतत्रप्रमाणसत्वात्॥एवंचयुवा

स्यात्साधुयुवाध्यायिक इत्यारभ्य स एको देवगंधर्वाणामानंद इति तैत्ति
रीय भृत्युक्तार्थश्चकारः॥ युवेत्यारभ्य सत्पट्टीपांवसुमंतीनिःकंटकंय
दि भुंक्ते सः मानुषानंदः प्रोक्तः स इति तस्यैनिवक्तव्य आनंदानंदिनोः

सत्पट्टीपांवसुमतीभुंक्ते निष्कंटकं यदि॥ स प्रोक्तो
मानुषानंदस्तस्माच्छतगुणो भृतः॥ ३४॥ मनुष्यस्त
जा प्रसायुक्तो गंधर्वो यते स तु॥ तस्माच्छतगुणो देवगंध
र्वस्य नसंशयः॥ ३५॥ ॥

पारमार्थिकाभेदविवक्षयैवमुक्तं॥ चानुक्रोधादिदुर्गुणाभावः सूचितः
शतगुणः शतसंख्या गुणितवृद्धिमान्॥ ३४॥ यो मनुष्यस्तपसा युक्तः
गंधर्वो जायते स तु गंधर्वः तस्मात् गंधर्वानंदाद्देवगंधर्वानंदः शतगुणो

ज्ञेयः ॥३५॥ एवं शततगुणानंद उत्तरोत्तरतः षष्ठ्यर्थेतसिल् ॥ पितॄणामिति देवगंधर्वापेक्षया चिरकालं चिरकालस्थायी लोको येषां पितॄणां तेषां

एवं शततगुणानंद उत्तरोत्तरतो भवेत् ॥ पितॄणां चिर लोकानामाजानसुरसंपदां ॥३६॥ श्रीशंभो ॥ ॥

कर्मभिः पितृत्वं प्राप्तानां कर्मणा पितृलोकः पितृलोकादूर्ध्वभाविनि ॥ आजानाख्यदेवलोकविशेषे सुराणां संपद्येषां ते आजानदेवास्तेषां कर्मदेवानामित्यर्थः ॥३६॥

देवतानामथेति॥ अथेत्यनेन स एको देवानामानंदाः इति श्रुत्युक्तः त्रयस्त्रिंशत्कोटिसंख्याकदेवानामित्यर्थः तथा च त्रिप्रकारा देवा गृहीता भवंतीति॥ यद्यपि देवानामिंद्रस्य गुरोश्चैकलोकवर्तित्वात् तत्प्रत्युक्त आनंदातिशयो नास्ति॥ अथापि विद्याकर्मानुष्ठानप्रयुक्त इति नानुपपत्तिः॥ तद्वदिति उत्तरोत्तरशतगुणानुवादपरः प्रजापतेः॥ विराड्रूपस्य ब्रह्मणः हिरण्यगर्भस्य च कारः पूर्वैः सहैतस्यैव पूर्वोत्तरावधित्वमिति सूचनार्थः॥३७॥

देवतानामथेंद्रस्य गुरोस्तद्वत्प्रजापतेः॥ ब्रह्मणश्चैवमानंदः पुरस्तादुत्तरोत्तरः॥३७॥ श्रीउमापतिप्र०

सुरालये स्वर्गेज्ञानाधिक्यात्सुखाधिक्यं भवति ॥ अन्यत् ज्ञानं विना सु
खे कारणं नास्ति श्रोत्रियो श्छंदो धीते यः ब्राह्मणः दे वाध्यायी अवृजिनः निः

ज्ञानाधिक्यात्सुखाधिक्यं नान्यदस्ति सुरालये ॥
श्रोत्रियो वृजिनोः कामहतो यश्च द्विजो भवेत् ॥ ३९ ॥

पापः अकामहमतः विषयाभिहतो यश्च न भवेत् तस्यापि एवं आनंदा
स्समाख्याताः श्रुतौ ॥ ३९ ॥ श्रीशूलपाणिय नमो नमः श्री शंकरः ॥

यतःकारणात् ॥ ब्राह्मणःब्रह्मवित् ब्रह्मज्ञानीकर्मभिःपुण्यकर्मभिर्नवर्द्धते अशुभैःपापैःकर्मभिर्नहीयते नैवक्षीणोभवतितस्मात्कारणात् ॥ हेदशर

तस्याप्येवंसमाख्याताआनंदाश्चोत्तरोत्तरं ॥ आत्मज्ञानात्परंनास्तितस्माद्दशरथात्मज ॥ ३९ ॥ ब्राह्मणःकर्मभिर्नैववर्द्धतेनैवहीयते ॥ नलिप्यतेपापकेनकर्मणाज्ञानवान्यतः ॥ ४० ॥

थात्मजआत्मज्ञानात्परं ॥ उत्कृष्टंकिमपिनास्ति अतःकारणात्ज्ञानमेवसंपादनीयं ॥ ३९ ॥ ४० ॥ ॥ ॥

यतःज्ञानवान्कर्मणाशुभाशुभेनलिप्यतेतस्मात्। ज्ञानवान्विप्रः
सर्वाधिकोभवति॥ एवंज्ञात्वायःकर्मकुरुतेतस्याक्षयफलंभवेत्॥४१

तस्मात्सर्वाधिकोविप्रोज्ञानवानेवजायते। ज्ञात्वायः
कुरुतेकर्मतस्याक्षयफलंभवेत्॥४१॥ यत्फलंलभते
मर्त्यःकोटिब्राह्मणभोजनैः। तत्फलंसमवाप्नोतिज्ञा
निनंयस्तुभोजयेत्॥४२॥ ॥ ॥

यामर्त्यःकोटिब्राह्मणभोजनैःफलंप्राप्नोतितत्फलंएकंज्ञानिनंयःभोज
येत् सःतत्फलंप्राप्नोति॥४२॥ ॥ ॥

यः नराधमः ज्ञानवंतं ब्राह्मणं द्विषते द्वेष्टि सः शुष्यमाणः शुष्यत्कंठो म्रियते ॥ यस्मादीश्वर एव सः तथा चेश्वरद्वेषयदुःखं तादृशं दुःखं प्राप्नोतीत्यर्थः ॥४३॥

ज्ञानवंतं द्विजं यस्तु द्विषते च नराधमः ॥ स शुष्यमाणो म्रियते यस्मादीश्वर एव सः ॥४३॥

तदेवमियता प्रबंधेन षष्ठसप्तमाभ्यां सर्वज्ञत्वाद्युपलक्षितं सच्चिदानंदात्मकं जीवाभिन्नं ब्रह्मस्वरूपं प्रतिपादितं ॥ अष्टमादिभिश्चतुर्भि

रध्याये देहादिस्वरूपनिरूपणद्वारा देहादिव्यतिरिक्तमकर्त्रभोक्ता
द्यात्मकं गमनाद्युपाधिनिर्मुक्तं ब्रह्माभेदयोग्यं जीवस्वरूपं निरूपितं
इदानीं तत्साधनजातं फलं च तदुपयुक्तं तृतीय चतुर्थाध्याय निरूपि

उपासको न यात्येव यस्मात्पुनरधो गतिं ॥ उपा
सनरतो भूत्वा तस्माद्दास्व सुखी भव ॥ ४४ ॥ ॥

तन्याय ॥ जातसिद्धं निरूपयितुं श्रीरामस्याधिकारानुरूपं साधनं निरू
पयति ॥ उपासक इति ॥ अधोगतिं संसारं ॥ तस्मात्कारणादुपासन
रतो भूत्वा त्वं सुखी भवति ॥ साधु पृष्टं महाभागेति समस्य कर्ममात्रा
धिकारनिरासेन श्रवणाद्यधिकारित्वसूचनात् ॥ रावणवधाद्युपाये

विक्षिप्तचित्तत्वेननिर्गुणश्रवणादौ मंदधिकारित्वप्रतिपादनात्॥ सगुणोपासनाद्यधिकारस्यसुस्थिरतयावक्तुंयुक्तत्वादमुमर्थमुपदिष्टवानितिभावः॥४५॥ इतिश्रीआख्याजींदीक्षितविरचितायां

इतिश्रीपद्मपुराणेशिवराघवसंवादेउपासनमहात्म्यंनामैकादशोध्यायसंपूर्णसमाप्तः॥११॥ ७ ॥

शिवगीतातात्पर्यदीपिकायांउपासनमहात्मनिरूपणंनामएकादशोध्यायसंपूर्णसमाप्तः॥११॥ श्रीसांबप्रसन्नोस्तु॥

तदेवं पूर्वाध्यायांत्तेऽधिकारानुरोधेन रामस्योपदेशव्याजेन पुनरा
वृत्तिनिवृत्त्यर्थंउपासनंकर्तव्यमित्युक्तं॥ तत्सप्रपंचंनिरूपयितुंराम
स्यप्रश्नमवतारयन्ति भगवन्निति॥ उपासनविधिंब्रूहीति अंगा

रामउवाच॥ भगवन्देवदेवेशानमस्तेस्तुमहेश्व
र॥ उपासनविधिंब्रूहिदेशंकालंचतस्यतु॥१॥ ॥

निकथंभावाकांक्षारूपकाणिच शब्दादुपास्यभेदांश्चेत्यर्थः एवंप्र
श्नेउत्तरमुवाच॥ श्रीभगवान्॥ शृणुवितत्त्रप्रथममुपास्यस्योत्क
र्षातिशयकथनेनस्वे ॥ ॥ ॥

तरोपासनं न कर्त्तव्यं स्वस्यैवोपासनं कर्त्तव्यमिति वक्तुं स्वस्य सर्वात्मकत्वं तावदाह सर्वाकार इति तत्र तत्रोपनिषत्सु ब्रह्मत्वेन प्रतिपाद्यः सर्वाकारः एकस्त्रिविधपरिच्छेदशून्योहमेव सर्वाकारः न तु म(स)

अंगानि नियमांश्चैव मयि तेनुग्रहो यदि ॥ ईश्वर उवाच ॥ शृणु राम प्रवक्ष्यामि देशं कालमुपासने ॥ सर्वाकारोहमेवैकः सच्चिदानंदविग्रहः ॥ २ ॥ श्रीहरः

द्व्यतिरेकेणान्यदेवतामूर्त्तयः संतीत्यर्थः ॥ सदसज्ज्ञप्रतिपक्षः चिच्चेतन्यतत्तज्जडप्रतिपक्षः आनंदो दुःखप्रतिपक्षः ते सच्चिदानंदाः विग्रहो मूर्त्तिर्यस्य ॥ २ ॥

ननुब्रह्माद्यधिष्ठितमूर्तयः पृथक् बहुळमुपलभ्यंते तत्कथं तवत्सर्वा
त्मकत्वमित्यत आह मंदशेनेति मंदशेन मत्प्रतिबिंबेन परिछिन्नाः

मंदशेन परिछिन्नादेहाः सर्वेदिवौकसां ।। यत्वन्य
देवताभक्तायजंते श्रद्धयान्विताः ।। २ ।।

अधिष्ठिताः सर्वेदेहाः दिवौकसां ब्रह्मादिदिवौकसां न तु मत्तः पृथक्
भूताः परमार्थतः एकमेवाद्वितिब्रह्म नेह नानास्ति किंचनेति नान्यातो
स्तिद्रष्टेत्यादिश्रुतिनिषिद्धत्वात् ।। ३ ।।

येत्वन्यदेवताभक्ताः भक्तियुक्ताः यजंते तेपि मामेव यजंते परंतु अवि
धिपूर्वकं अज्ञानपूर्वकं सर्वाधिष्ठानं मामज्ञात्वेति यावत् यस्मात् कर

तेपि मामेव राजेंद्र यजंत्यविधिपूर्वकं ॥ यस्मात्स
र्वमिदं विश्वं मत्तो न व्यतिरिच्यते ॥ ४ ॥ ॥

णात् सर्वमिदं विश्वं मत्तः सकाशात् न व्यतिरिच्यते अतिरिक्तं न भव
ति परमार्थतोद्वैतत्वादिति सर्वमनवद्यं ॥ ४ ॥ ।

सर्वक्रियाणांभोक्तृत्वंदेवतांतरेणभोक्तृत्वंस्वरूपेणफलदातृत्वंननुसें
इंद्रादीनुद्दिश्यनतत्कर्मविधानंतेषामेवतत्क्रियाभोक्तृत्वंफल
दातृत्वंचानुभूयतइतितत्रैवकथंतदुभयमित्यतआह येनका

सर्वक्रियाणांभोक्ताहंसर्वस्याहंफलप्रदः॥ येना
कारेणयेमर्त्यामामेवैकमुपासते॥ ५॥

रेणेति येनाकारेणब्रह्मेंद्राद्याकारेणास्थितंमामेकंयेमर्त्याउपा
सतेतेनाकारेणप्रसन्नस्तेभ्योवांछितंददे॥ ५॥ श्रीसदाशिवाय

॥ शिवगी० ॥ विधिनाश्रुत्युक्तक्रमप्रयोगेण अविधिनाअज्ञानाशक्तिकरणापाटवालस्यादि नाअपिशब्दात् अन्यदपिअंगन्यूनत्वेन भक्त्या ये मामुपासते तेभ्यः फलं प्रयच्छामि प्रसंनोहं न संशयः तेभ्यः भक्तेभ्यः फलं मोक्षं अन्यस्या ॥ अ० ॥

॥१५७॥ ॥१२॥

तेनाकारेण तेभ्योहं प्रसंनो वांछितं ददे ॥ विधिनाविधिनावापि भक्त्या ये मामुपासते ॥ ६ ॥ श्री उमापतिः

पासनाया मंगवैकल्यादिना फलाभावः मदुपासनायां त्वं गवैकल्यादिदोषाभावः स्मृत्यादौ प्रसिद्धः ॥ ६ ॥ ॥ ॥

॥१५७॥

अपिचेत्सुदुराचार इति ॥ सुदुराचारः शूद्रादिरपि स साधुरेव ज्ञानादियोग
युक्त एव ॥ शूद्रादेर्यज्ञादेरनधिकारेपि ज्ञानाधिकारसंभवात् ॥ सः सम्यग्व्यव
सितः सम्यक्बुद्धिव्यवसायवान् भवति ॥ ७ ॥ ननु त्वदुपासनं भेदेन वा अ॰

तेभ्यः फलं प्रयच्छामि प्रसन्नोहं न संशयः ॥ अपिचे
त्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मं
तव्यः सम्यग्व्यवसितो हि सः ॥ ७ ॥ श्रीशंकरप्रसन्न

ऽभेदेन वा अन्यभ्यो ऽन्यां देवतामुपास्ते ऽन्योसावन्योहमस्मीति न स वे
द ॥ यथा पशुरेव सः मृत्योः ॥ स मृत्युमाप्नोति य इह ॥ नानेव पश्यतीति

भेदोपासनस्य निषिद्धत्वात् अभेदेनोपासने विरुद्धानेकधर्माक्रांतत्वात्कथं त्वदुपासनं कार्यमित्यत आह ॥ स्वजीवत्वेनेति ॥ अन्योसावन्योहमिति धीर्न यस्य भवतीत्यनन्यधीः भेदबुद्धिरहित इत्यर्थः एकं सजातीयवि

स्वजीवत्वेन यो वेत्ति मामेवैकमनन्यधीः ॥ तं न स्पृशंति पापानि ब्रह्महत्यादिकान्यपि ॥ ९ ॥ श्रीहरः

जातीयस्वगतभेदशून्यं परमानंदाद्वितियमेव स्वजीवत्वेन स्वस्मिन् अहंप्रत्ययविषयचिदचिदात्मकेंतःकरणे यज्जीवस्वरूपं चिद्रूपत्वेन तदभिन्नतया वेत्ति उपास्ते तं तु ब्रह्महत्यादिकानि पापानि ॥ अपिशब्दात् संसारित्वादिकमपि न स्पृशंति ॥ ९ ॥

उपासाविधयः उपासनप्रकाराः चत्वारः प्रकीर्तिताः संपदुपासना आरोपोपासना संवर्गोपासना अध्यासोपासना चेति ॥ ९ ॥ अल्पस्य अधिकत्वेन गुणयोगाद्विचिंतनं ससंपद्विधिः संपदुपासनाख्ये येतिशेषः ॥ यथा

उपासाविधयस्तत्र चत्वारः परिकिर्तिताः ॥ संपदारोपसंवर्गाध्यासा इति मनीषिभिः ॥ ९ ॥ अल्पस्य चाधिकत्वेन गुणयोगाद्विचिंतनं ॥ अनंतं वै मन इत्ति, संपद्विधिरुदीरितः ॥ १० ॥

अनंतं वै मन इत्ति अल्पं अणुपरिमाणं मनः तस्याधिकगुणत्वेन अनंतमिति गुणत्वेन विचिंतनं ससंपद्विधिरित्ति ॥ १० ॥ श्रीरामसमर्थ

आरोपोपासनामाह॥ विधाविति॥ यद्वदिति दृष्टांतः ॐकारमुद्गीथमुपासीतेति ॐकारे उद्गीथस्वप्राणस्यारोपइति आरोपोपासनाबुद्धिपूर्वेणयः अरोपः स अरोपइति॥ ११॥ योषित्यग्निरिति यामतिस अध्या

विधावारोप्य योपासा सारोपः परिकीर्तितः॥ यद्वद्धोंकारमुद्गीथमुपासीतेत्सुदाहृतः॥ ११॥ आरोपोबुद्धिपूर्वेणय उपासाविधिश्चसः॥ योषित्यग्निमतिर्यत्तदध्यासः स उदाहृतः॥ १२॥ श्री उमापतियनमः

स उदाहृतः सिंहोमाणवकइत्यादि यथा सिंहस्य क्रौयादियोगुणास्ते माणवके आरोप्यंते अयं अध्यासविधिरुदाहृतइति॥ १२॥ ॥

संवर्गमुपासनमाह क्रियायोगेनेतिकर्मयोगेनयः उपासाविधिः संवर्गः यथासंहृत्येति पाठः वायुः प्रलयभूतानिसंहृत्य एकोवसीदति तिष्ठतीति ॥१३॥ बुध्यासूक्ष्मयाचित्तैकाग्र्येण उपसंगम्य यत् देवतात्म

क्रियायोगेनयोपासाविधिः संवर्ग उच्यते। संहृत्य वायुः प्रलये भूतान्येकोवसीदति ॥१३॥ उपसंगम्य बुध्यायदासनं देवतात्मना। तदुपासनमंतः स्यात्तद्बहिः संपदा ॥१४॥ इयः

नाध्येयदेवतास्वरूपत्वेन आसनं स्थितिः स्वरूपधारणेनियावत् तदुपासनमंतः हृदयमध्य एव बहिस्तुचित्तसावधानार्थं संपदादयविधयः उक्ताः ॥१४॥

एवंचावृत्तिरसकृदुपदेशादित्यधिकरणसिद्धावृत्तिगुणप्रत्ययउपासन
मुक्तंतस्याननिप्रसक्तंलक्षणमाहज्ञानानांनरानंतरितेत्तिज्ञानांतरैर्वि
जातीयज्ञानैरूपास्याविषयकैरनंतरितानिमध्येमध्येव्यवधानरहिता

ज्ञानांनरानंतरितसजातिज्ञानसंहतेः॥ संपन्नदेवता
त्मत्वमुपासनमुदीरितं॥१५॥ श्रीसांबसदाशिवायनमः॥

नियानिसजातीयज्ञानानितेषांसंहतेःसमूहात्संपन्नदेवत्तात्मत्वंउपा
स्यदेवतास्वरूपत्वंतद्देवफलपर्यवसायीनिर्वोषःआवृत्त्यधिकरणन्या
येनेवप्रत्ययदार्ढ्यमेवावधिःसचतत्फलसंपादनक्षमत्वंतच्चामु
ष्मिकफलेषुआप्रायणमावृत्त्यैवभवति॥१५॥ ॥ ॥

कर्मकालेऔद्गात्रादिकर्मकाले तदंगेषु यदुपासनं ॐकारमुद्गीथमु
पासीतेतियद्विहितं तत्काले तद्दृष्टिमात्रं कर्त्तव्यं ॥ उपासनाद्विविधा
ब्रह्मोपासनाप्रतीकोपासनाचब्रह्मोपासनापिद्विविधासगुणनिर्गु

संपदादिषु बाह्येषु दृढबुद्धिरुपासनं ॥ कर्मकाले तदंगे
षु दृष्टिमात्रमुपासनं ॥ १६ ॥ उपासनमिति प्रोक्तं तदंगा
नि ब्रुवे शृणु ॥ १६ ॥ तीर्थक्षेत्रादिगमनं श्रद्धां तत्र परित्य

त्रत जेत् ॥ स्वचित्तैकाग्रतायं त्रासीत सुखं द्विजः ॥ १७ ॥

णभेदेन ॥ प्रतीकोपासनाचतुर्विधा ॥ संपदादिभेदेनेति ॥ १६ ॥ तत्रांतरुपा
सने ॥ तीर्थं गंगादि क्षेत्रं वाराणस्यादि आदि शब्दात् ॥ पर्वताग्रादि गमने
श्रद्धासुखमासीतेत्युत्तन्यानि ष्टन्नासीनः शयानो वोपासीतेति ॥ १७ ॥

कंबले आसने ऊर्णामये मृदुतल्पे कोमले तल्पे काष्ठनिर्मिते वा व्याघ्रचर्मणि प्रसिद्धे। स्थितः विविक्तदेशे पवित्रदेशे स्थितः नियतः यतचित्तः समग्रीवशिरस्तनुः ग्रीवा च शिरश्च तनुश्च तासां समाहारः समग्री

कंबले मृदुतल्पे वा व्याघ्रचर्मणि वा स्थितः। विविक्तदेशे नियतः समग्रीवशिरस्तनुः॥१८॥ श्रीशंकर

वाशिरस्तनुर्यस्य। द्वंद्वश्च प्राणितूर्यसेनांगानामित्येकवद्भावः॥१८॥

अत्याश्रमस्थइति ॥ अत्याश्रमस्थः आश्रमस्थानतिक्रम्य वर्त्तन इति अ
त्याश्रमस्थः अत्यादयः क्रांताद्यर्थे द्वितीया ब्रह्मनिष्ठः भगवद्भक्तः स

अत्याश्रमस्थः सकलानींद्रियाणि निरुध्य च ॥ भ
क्त्याथ स्वगुरुं नत्वा योगं विद्वान् प्रयोजयेत् ॥ १९ ॥

कलानींद्रियाणि निरुध्य भक्त्या गुरुं योगोपदेष्टारं नत्वा योगं सगुण
धारणारूपं विद्वान् ज्ञानैकतत्परः सन् प्रयोजयेत् ॥ १९ ॥ ॥ ॥

यस्त्विति अविज्ञानवान् ॥ अयुक्तबुद्धिः असावधानबुद्धिर्मनसा सह भवति तस्येंद्रियाणि अवश्यानि भवंतीति शेषः दुष्टा अदांता अश्वाः सारथेरिव ॥२०॥ विज्ञानी यस्तु यत्नेन एकाग्रेण मनसा सह सावधा

यस्त्वविज्ञानवान् भवत्ययुक्तमनसा सह ॥ तस्येंद्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥२०॥ विज्ञानी यस्तु भवति यत्तेन मनसा सह ॥ तस्येंद्रियाणि वश्यानि सदश्वा इव सारथेः ॥२१॥

नबुद्धिः तस्येंद्रियाणि वश्यानि विषयनिष्ठानि न भवंति ॥ सदश्वा इव दांता अश्वाः यथा सारथेः वश्याः भवंति ॥२१॥

मनोनिग्रहस्याप्यन्वयव्यतिरेकौ वदन् इंद्रियवश्यानायाः प्रयोजन
माह ॥ यस्त्वविज्ञानवान् ॥ अमनस्कश्च अनिगृहीतमनाः सः सदाशु

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः ॥ नसत्त
त्पदमाप्नोति संसारमधिगच्छति ॥ २२ ॥ श्रीशंकर

चिः आंतरशुद्धिरहितः ॥ तत्पदं सत्यज्ञानानंदात्मकं पदं पदनीयं आ
त्मानं न प्राप्नोति ततः किं प्राप्नोति संसारमधिगच्छति अधिक्येन प्राप्नोति ॥ २२ ॥

विज्ञानी आत्मनात्मकविवेकवद्बुद्धियुक्तः समनस्कः निगृहीतमनाश्च स
सदाशुचिः स तत्पदमवाप्नोति नैनु सुषुप्ताविव ब्रह्म प्राप्तौ पुनरुत्पादः

विज्ञानी यस्तु भवति समनस्कः सदाशुचिः स तत्पद
मवाप्नोति यस्माद्भूयो न जायते ॥२३॥ श्रीगौरिहर

कस्मान्न भवतीत्यत आह यस्मादिति विवेकादिना साक्षात्कारद्वारा
प्राप्तात्पदात् । प्रच्युतः सन्संसारमंडलं पुनर्न प्रविशन्ति ॥२३॥ ॥

पूर्वश्रुत्युक्तं रथिकसामग्रीरूपकमुपजीव्य प्रवृत्तां श्रुतिं संगृण्हाति विज्ञानसारथिरिति ॥ विज्ञानसारथिः आत्मानात्मविवेकवती बुद्धिर्विज्ञानं सैव सारथिर्यस्य ॥ मनःप्रग्रहः खलीनादिर्यस्य सः अध्वनः पारं संसाररू सं

विज्ञानसारथिर्यस्तु मनःप्रग्रह एव च ॥ सोध्वनः पारमाप्नोति मममेव परमं पदं ॥ २४ ॥ हृत्पुंडरीकं विरजं विशुद्धं विशदं तथा ॥ विशोकं च विचिंत्यात्र ध्यायेन्मां परमेश्वरं ॥ २५ ॥

पस्याध्वनः पारं अंतं ममैव परमं पदं स्वरूपं प्राप्नोति ॥ २४ ॥ हृत्पुंडरिकं हृदयकमलं विरजं रजोगुणरहितं अत एव विशुद्धं शुद्धसत्वात्मकं विशदं निर्मलं गुणरहितं अत एव विशोकं शोकातीतं विचिंत्य एवं विशिष्टगुणत्वं संपाद्य तत्र हृदयकमले मां परमेश्वरं ध्यायेत् ॥ २५ ॥ ॥

अचिंत्यरूपमिति। अव्यक्तं मनआद्यगोचरं। आनंतं त्रिविधपरिछेद
शून्यं अमृतं मरणशून्यं आदिमध्यांतरहितं उत्पत्तिस्थितिनाशशून्यं
प्रशांतं आनंदमूर्ति ब्रह्म परिपूर्ण कारणं प्रपंचस्य ॥२६॥ एकं सजाती

अचिंत्यरूपमव्यक्तमनंतममृतं शिवं। आदिमध्यांतर
हितं प्रशांतं ब्रह्मकारणं ॥२६॥ एकं विभुं चिदानंदमरू
पमजमव्ययं। शुद्धस्फटिकसंकाशमुमादेहार्धधारिणं ॥२७॥

यविजातीयस्वगतभेदशून्यं विभुं व्यापकं चिदानंदं स्वरूपं अजं जन्म
शून्यं अतएवाव्ययं षड्विकाररहितं उमादेहार्धधारिणं शिवशक्त्या
त्मकं एकस्मिन्देहे स्त्रीपुरुषात्मकरूपसंभवात् अतएवाद्भुतमित्यर्कः ॥२७॥

व्याघ्रचर्मांबरधरं स्पष्टं ॥ २८ ॥ वरेण्यं वामाधःकरे वरप्रदं दक्षिणाधःकरे अभयप्रदं पराभ्यामूर्ध्वहस्ताभ्यां परशुं मृगं च विभ्राणं वरदाभयहस्तापेक्षयान्याभ्यां दक्षिणे उर्ध्वहस्ते परशुं वामे उर्ध्वहस्ते च मृगं ॥ २९ ॥

व्याघ्रचर्मांबरधरं नीलकंठं त्रिलोचनं ॥ जटाधरं चंद्रमौलिं नागयज्ञोपवीतिनं ॥ २८ ॥ व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं ॥ पराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगं ॥ २९ ॥ कोटिमध्यान्हसूर्याभं चंद्रकोटिसुशीतलं ॥ चंद्रसूर्याग्निनयनं स्मेरवक्त्रसरोरुहं ॥ २९ ॥ ३० ॥ रु ॥

कोटिमध्यान्हसूर्याभमिति अत्यक्षमप्रभं स्यादित्यन आह चंद्रकोटिसुशीतलमिति ॥ स्मेरवक्त्रसरोरुहमिति शक्तियुक्तत्वेनातिसौंदर्यमुक्तं ॥ ३० ॥

त्रि

त्यं

सर्वाभरणभूषितं ॥ तत्तदंगयोग्यसर्वाभरणमिति भावः॥३०॥ तदेवं ध्यायेनां परमेश्वरमित्यत्र ध्येयरूपमुपदिष्टं ॥ तत्रोर्ध्वस्वरूपइश्वरोहमस्मीतिज्ञानोत्पत्त्यैउपायंवदन्श्रुतेरस्थसगुणोपासनापरवाक्येन

भूतिभूषितसर्वांगंसर्वाभरणभूषितं ॥ एवमात्मारणिंकृत्वा प्रणवंचोत्तरारणिं ॥३१॥ ॥ ॥

संहितवाक्यतां वक्तुं तद्वाक्यंसां गृण्हाति एवमात्मारणिमिति ॥ आत्मारणिं परमेश्वरत्वाद्युक्तगुणविशिष्टतया सगुणब्रह्मात्मकाधरणिं प्रणवंचोत्तराणिंकृत्वाज्ञानं प्रणवाभिधेयत्वेनचोत्तराणिं ॥३१॥ प्रणवावलंबनत्वेनयाब्रह्मणश्चिंतनं ध्यानं तदेवनिर्मथनं पूर्वोत्तरारणिमध्य

स्थ मंथानभ्रमणं तस्याभ्यासो यावत्साक्षात्कारस्तस्मात् जनः॥ जनन
धर्मोपासकः एवं प्रणवेनात्मानं ब्रह्मरूपत्वेनानुसंधानैस्तदभ्यासव
शेन दारुणि मथ्यमाने। अग्निमिव मां पश्यति॥ ३१॥ ध्यानातिरिक्तसा

ध्याननिर्मथनाभ्यासात्साक्षात्पश्यति मां जनः॥
वेदवाक्यैरलभ्योऽहं न शास्त्रैर्नापि चेतसा॥ ३२॥

धनैर्व्यतिरेकमाह॥ वेदवाक्यैरलभ्योऽहमिति ध्यानेन यः उपासकः सर्व
दा मां वृणुते ध्येयरूपत्वेन चिंतयति अहमपि तं उपासकं वृणोमि सा
क्षात् स्वरूपदर्शनं कारयामि सर्वदा प्रकटो भवामीत्यर्थः॥ ३२॥ ॥

नाविरतोदुश्चरितान् दुश्चरितादिदोषसहितः॥ अशांतः॥ अप्रसन्नचित्तः असमाहितः सावधानबुद्धिरहितः॥ नाशांतमानसोपि मां नलभेत किंतु ज्ञानेनैव मां लभेतेति॥ ३३॥ अभेदोपासनासाक्षात्कारमाहात्म्यमाह

ध्यानेन वृणुते यो मां सर्वदाहं वृणोमि तं॥ नाविरतो दुश्चरितान्नाशांतो नासमाहितः॥ ३३॥ नाशांतमानसो वापि प्रज्ञानेन लभेत मां॥ ३३॥ जाग्रत्स्वप्न सुषुप्त्यादि प्रपंचं यत्प्रकाशयेत्॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥ ३४॥

भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति श्रुतेः॥ ३४॥

त्रिषु धामसु जाग्रत्स्वप्नसुषुप्तिषु यद्भोग्यं विषयजातं भोक्ता अंतःकरणो पहितचैतन्यं जीवः भोगश्च भोगसाधनं करणादि ॥ तेभ्यो विलक्षणः ॥ भोग्यभोक्तृभोगेभ्यः विविक्तः साक्षी चिन्मात्रोहं सदाशिव इति ध्याना

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ॥ तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः ॥ ३५ ॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापि सर्वभूतांतरात्मा

न्यासफलमुक्तं ॥ ३५ ॥ एकः सजातीयादिभेदशून्यः प्रतीयादित्यत आह देवः स्वप्रकाशः ननु स्वप्रकाशत्वस्य परप्रकाश्यसापेक्षत्वात्तदभावे कथं तादृक् ॥ स्यादित्यत आह ॥ सर्वभूतेष्विति ॥ चतुर्विधेषु जातिभेदेषु त

त्रसुखदुःखादीनां परप्रकाश्यानामुपलंभात्॥ तदनुरोधेन अयं स्वप्र
काश इत्यर्थः ननु च यं किं प्रतीयत इत्यत आह॥ गूढ इति आविद्यको हं म
माभिमानेन गूढ इति सर्वभूताधिवासः चतुर्विध प्राणिबुद्धेराभ्यंतरः
तथा चेत् सुखदुःखयो र्भोक्तासंसार्यवायमित्यत आह॥ सर्वाध्यक्ष इति

सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥३७॥

सुखदुःखादीनां नियंता न तु भोक्ता नियंता चेत्तटस्थ एव स्यादित्यत आह
सर्वभूतानां तरात्मेति सर्वभूतान्यात्मत्वेनाधिकृत्य वसतीति सर्वात्मस्वरूपः
द्रष्टा बोद्धेव न तु शरीरादिमान् यतः साक्षी केवलः निरूपाधिः अत एव
निर्गुणश्च ॥३७॥

एवं सर्वेश्वर एकोहं एकं बीजं प्रकृतिरूपं मायानित्यं तावशी बहुधा यः उपाधिभेदैः बहुप्रकारं करोति ॥ एतादृशं मां सर्वभूतानतरात्मानं ये धीराः वि

एकोवशी सर्वभूतांतरात्मा प्येकं बीजं बहुधा यः करोति ॥ तं मां नित्यं ये नु पश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषां ॥ ३८ ॥

वेकिनः अनुपश्यंति श्रवणमनननिदिध्यासनैरात्मविचारेण योगेन वा पश्यंति तेषां शाश्वती शांति निरतिशयं सुखं नेतरेषां ॥ ३८ ॥ ।

अत्रदृष्टांतमाहअग्निर्यथैकःभुवनंप्रविष्टःसन्रूपंरूपंप्रत्युपाधिंप्रतिरू
पोनेकप्रकारःभवंतिएकःसर्वेश्वरस्तथाउपाधिभेदैःसर्वभूतांतरात्माभ

अग्निर्यथैकोभुवनंप्रविष्टोरूपंरूपंप्रतिरूपोबभूव॥
एकस्तथासर्वभूतांतरात्मानलिप्यतेलोकदुःखेनबाह्यः॥३९॥

वतितथापिलोकदुःखेनदेहाद्यभिमानजनितेनदुःखेनबाह्यअलिप्तोभ
वति॥३९॥

अहंअलुप्तचिद्दृष्टिरेतंबुध्यादिप्रवर्त्तकंअपरोक्षंमहांतंअपरिछिन्नंआ
दित्यवर्णंस्वप्रकाशंतमसःमायायाःपरस्तात्परंभिन्नंवेदजानामिएता

वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्ता
त्॥सएवंविद्वान्मृतोत्र भूयान्नान्यस्तत्पंथाअय
नायविद्यते॥४०॥

दृशंअत्रसशरीरावस्थायांयएवंविद्वान्सएवअमृतोमृत्युरहितोभूया
त्अन्यःज्ञानाद्भिन्नस्तत्पंथांमार्गअयनायमोक्षायनविद्यतेनास्ति॥४०॥

अहं पूर्वं सृष्टेः प्राक् हिरण्यगर्भं विदधामि ॥ यो ब्रह्माणं विदधाति पूर्वमित्यादिश्रुतेः यो हं तस्मै वेदांश्च प्रहिणोमि प्रापयामि ॥ तं तादृशं ब्रह्मादिकर्तारं देवं ध्यानेन शील्लं इड्यं स्तुत्यं ब्रह्मादिभिः पुराणं पुराप्यनवं पुरुषं

हिरण्यगर्भं विदधामि पूर्वं वेदांश्च तस्मै प्रहिणोमि
यो हं ॥ तं देवमीड्यं पुरुषं पुराणं निश्चित्य मां मृत्यु
मुखात्प्रमुच्यते ॥ ४१ ॥ श्रीसांबसदाशिवायनमः

पूर्षु शरीरेषु शेते सो पुरुषस्तं सर्वाधिष्ठातारं निश्चित्य निःसंशयं ज्ञात्वा मृत्युमुखात् जननमरणलक्षणात् संसारात् प्रमुच्यते मुक्तो भवति ॥ ४१ ॥

इदानीमुक्तोपासनाविशिष्टज्ञानस्य फलं दर्शयन् अध्यायार्थमुपसंहर
त्येवमिति ॥ तत्वतोऽहंकारादिभ्यो निष्कृष्टत्वेन जीवाभिन्नं मां यः शांत्यादि
युक्तः सन् साधनचतुष्टयसंपन्नः सन् साक्षात्करोति सः निर्मुक्तदुःखसंता

एवं शांत्यादियुक्तः सन्वेत्ति मां तत्वतस्तु यः ॥ निर्मु
क्तदुःखसंतानः सोंते मय्येव लीयते ॥ ४२ ॥

नो नामत्यक्तस्यापि दुःखस्य पुनरुत्पादः नितरां मुक्तः पुनरुत्पादो यस्य
सः तथा ॥ अंते देहपातानंतरं मय्येव कारणे कैवल्यं प्राप्नोतीत्यक्षरार्थः
यज्ज्ञात्वा मुच्यते जंतुरमृतत्वं च गच्छति ॥ ज्ञात्वा तं मृत्युमत्येति ॥ न स पुन

रावर्तते न स पुनरावर्तत इत्यादिभ्यः इत्यनव ॥ ४२ ॥ श्री उमापतिर्यनमः ॥

१३ज्ञा

इतिश्रीआप्याजीदीक्षितविरचितायांशिवगीताटीकायांतात्पर्यदीपि

इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुब्रह्मवि
द्यायांयोगशास्त्रेश्रीशिवराघवसंवादेउपासनवि
धिर्नामद्वादशोऽध्यायः॥ १२॥ ६७ ॥ ६५ ॥

कायांउपासनविधिर्नामद्वादशोऽध्यायः॥ १२ ॥श्रीसांबसदाशिवोनमः

एवं तावत्पूर्वाध्याये उपासनया ज्ञानस्य फलं मुक्तिः प्रतिपादिता तच्छ्रुत्वा
तत्स्वरूपं तेन लक्षणं तद्भेदं तत्साधनानि च जिज्ञासो रामस्य प्रश्नं वर्णयति (?) ता

म

सूत उवाच ॥ एवं श्रुत्वा कौशलेयस्तुष्टो मनिम
तां वरः ॥ पप्रच्छ गिरिजाकांतं सुभगं मुक्तिलक्ष
णं ॥ १ ॥ राम उवाच ॥ भगवन्करुणाविष्टहृदय
त्वं प्रसीद मे ॥ स्वरूपं लक्षणं मुक्तेः प्रब्रूहि परमेश्वर ॥ २ ॥

रयति सूतः एवमिति ॥ सुभगं परमपुरुषार्थसाधनत्वात् ॥ १ ॥ भगवन्नि
ति ॥ हे भगवान् षड्गुणैश्वर्यसंपन्न स्वरूपं लक्षणमिति तद्भेद तत्साधनाना
मुपलक्षणं ॥ २ ॥

साल्लोक्यमिति॥ सल्लोकस्य भावः साल्लोक्यं सरूपस्य भावः सारूप्यं सार्ष्टर्यं ऋष्टिरैश्वर्यं समाना ऋष्टिर्यस्य सार्ष्टिस्तथा भावः सार्ष्टं समानैश्वर्य सायुज्यं सहयोगः केवलस्य

श्रीभगवानुवाच॥ साल्लोक्यमपि सारूप्यं सार्ष्ट्यं सायुज्यमेव च॥ कैवल्यं चेति तां विद्धि मुक्तिं राघव पंचधा॥ ३॥

भावः कैवल्यं आनंदं निष्प्रपंचानंदात्मकस्वरूपं पंचधेति सामीप्यस्याप्येष्वेवांतर्भावः॥ ३॥

न

निर्देशानुसारेण सालोक्यमुक्तिसाधर्म्यमाह। मां पूजयन्तीति यः निःकामः फलाभिसंधिरहितः ज्ञानवर्जितः आत्मनात्मविवेकरूपज्ञानवर्जितोपि मां सर्वदा पूजयति पूजामात्रं करोति सः मे लोकं समासाद्य

मां पूजयन्ति निष्कामः सर्वदा ज्ञानवर्जितः॥ स मे लोकं समासाद्य भुंक्ते भोगान्यथेप्सितान्॥ ४॥
ज्ञात्वा मां पूजयेद्यस्तु सर्वकामविवर्जितः॥ मया समानरूपः सन्मम लोके महीयते॥ ५॥

थेप्सितान् भोगान् भुंक्ते अंते तेन सह मुच्यत इत्यर्थः॥ ४॥ सरूपतामाह॥ ज्ञात्वेति॥ महीयते समृद्धो भवति॥ ५॥

तृतीयायां मुक्तिमाह इष्टापूर्त्तादिकर्माणीति इष्टानि यागादि श्रौतकर्माणि पूर्तं वापीकूपादि आदिशब्दाद्दानादीनि यस्तु मत्प्रीत्यै कुरुते स मल्लोके मत्समानैश्वर्यं अनुभवतीति द्वितीयश्लोकस्थप्रथमपादेना

इष्टापूर्त्तादिकर्माणि मत्प्रीत्यै कुरुते तु यः ॥ यत्करोति यदश्नाति यज्जुहोति ददाति यत् ॥ ८ ॥

न्वयः चतुर्थमुक्तेः साधनमाह ॥ यत्करोतीति लौकिकमपि यत् अश्नाति हितमेध्याशनादि करोति यत् जुहोति अग्निहोत्रादिना यत् ददाति गोदानादि ॥ ८ ॥

यत्त पश्यनिक्कच्छादिना तत्सर्वं यः मदर्पणं मह्यमर्पणं ब्रह्मार्पणधियाक
रोति सः मत्तुल्यप्राभवं तद्देवसायुज्यं तदात्मना एकत्वं तुल्यप्रभुत्वं संग

यत्त पश्यति तत्सर्वं यः करोति मदर्पणं ॥ मल्लोकेस
श्रियं भुंक्ते मत्तुल्यप्राभवं भजेत् ॥ ७ ॥ ॥

च्छते नान्यथेति सायुज्यमुक्तं ॥ ७ ॥ यदर्थं मुक्तिभेदानिरूपिता स्तांपंच
मींमुक्तिं उपलक्षयन्ति ॥ यस्त्विति यस्तुशांत्यादिसाधनसंपन्नाः सन् मा

मात्मत्वेनजीवेश्वरयोरविद्यामायाकृतोपाधिलयेनचिन्मात्रयोरखंडानु
भवेनपश्यतिसजायतेपरंज्योतिरितिअद्वैतंत्रिविधपरिच्छेदशून्यंपरंउत्कृ
ष्टंज्योतिःस्वप्रकाशंकेवलंब्रह्मैवजायते॥सर्वोपाधिलयोर्शुद्धब्रह्मरूपो

यस्तुशांत्यादियुक्तःसन्मामात्मत्वेनपश्यति॥
सजायतेपरंज्योतिरद्वैतंब्रह्मकेवलं॥ ८॥

भवति॥सर्वोपाधयोविद्याकृताःविद्ययाविद्यायांनष्टायांसर्वप्रपंचा
धिष्ठानंब्रह्मैवावशिष्टंभवतीत्यर्थःयथाघटाकाशाद्युपाधिलयान्महा
काशइतियथावासोदकघटविनाशात्सूर्यादिः॥ ८॥

आत्मस्वरूपावस्थानमिति आत्मस्वरूपस्थित्यायत्नु॥ अवस्थानंस्थितिंसा
मुक्तिरित्यभिधीयते॥ स्वरूपस्थितिमाह॥ सत्यमिति सत्यंत्रिकालाबाध्यं

आत्मस्वरूपावस्थानंमुक्तिरित्यभिधीयते॥ सत्यंज्ञा
नमनंतंसदानंदब्रह्मकेवलं॥ १॥ श्रीउमापतिनमः

ज्ञानंज्ञप्तिमात्रंअनंतंदेशतःकालतःवस्तुतःपरिछेदशून्यंसदानंद
रूपंकेवलंब्रह्म॥ १॥

सर्वकर्मविहीनंनिष्क्रियंयस्मात्सजातीयविजातीयपदार्थानांतद्व्यतिरिक्तानामसंभवात् अतोद्वैतमितिसंज्ञितंशुद्धंमत्स्वरूपंयदभिधीयतेतेन

सर्वकर्मविहीनंच यस्माद्वाचामगोचरं॥ सजाती
यविजातीयपदार्थानामसंभवात्॥१०॥ अतस्त
द्व्यतिरिक्तानामद्वैतमितिसंज्ञितं॥मत्स्वरूपमिदंरा
मशुद्धंयदभिधीयते॥११॥ ॥ ॥

स्वरूपेणास्थितिर्मुक्तिरिति॥१०॥सत्यादिरूपंशुद्धंयत् मत्स्वरूपंसैवमु
क्तिरित्यभिधीयते॥११॥ ॥ ॥

नन्वेवंभूतत्वे परिदृश्यमानस्य प्रपंचस्य कागतिरित्याह। मय्येवेति ननु एवं तन्मापते तत्राह। व्योम्नीति॥ यथा गंधर्वनगरं व्योम्नि दृष्टं सत्क्षणमात्रेण न दृश्यते॥ एवं सर्वं स्थावरजंगमं प्रपंचजातं यावदविद्यास्ति

मय्येव दृश्यते सर्वं जगत्स्थावरजंगमं॥ व्योम्नि गंधर्वनगरं यथा दृष्टं न दृश्यते॥ १२॥ ॥ ॥

तावत्सर्वं सत्यमिति दृश्यते॥ यदात्मतत्त्वस्वरूपज्ञानेनाविद्यायां नष्टायां किमपि मत्स्वरूपातिरिक्तं नास्ति॥ नेह नानास्तीति किंचनेति॥ १२॥ ॥

अनाद्यविद्ययेति ॥ अनाद्यविद्यया सर्वं विश्वं मय्येव कल्प्यते ॥ मत्स्वरूप ज्ञानेन नु निवर्तते नश्यति ॥१३॥ मम स्वरूपज्ञानेन यदा अविद्यामूला

अनाद्यविद्यया विश्वं सर्वं मय्येव कल्प्यते ॥ निवर्तते तु मय्येव मय्येवेदं विलीयते ॥१३॥ मम स्वरूपज्ञानेन यदाविद्या प्रणश्यति ॥ तदैक एव वर्तेहं मनोवाचामगोचरः ॥१४॥

विद्या प्रणश्यति ॥ तदा मनोवाचामगोचरः ॥ अहमेव अनामरूपत्वाच्चब्रह्माहमेक एव वर्तेवर्तामीत्यर्थः ॥१४॥

संदेवमिति ॥ सदापरमानंदइत्यर्थः ॥ एषोस्य परमानंद इतिश्रुतेः स्वप्रकाशः
अयं पुरुषः स्वयंज्योतिः तस्य भासा सर्वमिदं विभातीतिश्रुतेः श्चिदात्मकश्चे
ति ॥ १५ ॥ पुनरपि स्वरूपस्थितिमहि यदा कालः न पंचभूतानि आकाशादी

संदेवं परमानंदः स्वप्रकाशश्चिदात्मकः ॥ नकालः
पंचभूतानि न दिशो विदिशश्च न ॥ १५ ॥ मदन्यन्नास्ति
यत्किंचित्तदा वर्त्तेहमेकलः ॥ १६ ॥ श्रीउमापतिनमः

नि न दिशो विदिशः अवांतरदिशश्च न मदन्यत् ॥ यत्किंचिदपि वस्तुजातं न त
तदा केवलोहमेव वर्त्ते ॥ १६ ॥

नसंदृशाइति ॥ चिन्मात्रस्वरूपस्यमेवस्वरूपमखंडानंदरसंसंदृश्येयत्रदर्शनं विषयेनतिष्ठति ॥ अत्रराहोःशिरइतिपदभेदेपिभेदव्ययदेशःननुतस्य कथमुपलब्धिरित्याह ॥ हृदाहृत्स्थयाबुध्याकीदृश्यामनीषामनसोनियं

नसंदृशेतिष्ठतिमेस्वरूपेनचक्षुषापश्यतिमांतुक श्चित् ॥ हृदामनीषामनसाभिकॢप्त्यंयेमांविदुस्तेह्यमृताभवंति ॥ १७ ॥

तृत्वेनमनीषनयामनासामननरूपेणसम्यग्दर्शनेनअभिकॢप्त्यंप्रकर्ट येमांविदुस्तेह्यमृताभवंति ॥ १७ ॥

ननुईदृक्ज्ञानं सर्वेषां सर्वदाकिं न स्यादितिकुचोद्यानिरासाय वैराग्यपू
र्वकश्रवणाद्यंतरंगसाधनं संपत्तिं वक्तुं रामस्य प्रश्नमवातारयतिकथमि

रामउवाच॥ कथं भगवतोज्ञानं शुद्धं मर्त्यस्य जाय
ते॥ तन्नोपायं हर ब्रूहि मयि ते नुग्रहो यदि॥ १८॥

ति॥ कथं केन प्रकारेण भगवतोज्ञानं मर्त्यस्य जायते॥ तत्र ज्ञानोत्पत्ति प्रका
रे हे हर संसार वैद्य उपायं ब्रूहि मयि ते नुग्रहो यदि तर्हि ब्रूहि लोकानुग्रहे। आदरार्थे॥ १८॥

 विरज्ये सर्वभूतेभ्यइत्ति॥ सर्वभूतेभ्यः सर्वप्राणिविषयस्थानेभ्यः आविरिंचि

श्रीभगवानुवाच॥ विरज्यसर्वभूतेभ्यआविरंचिपदा दपि॥ घृणांवितत्यसर्वत्रपुत्रमित्रादिकेष्वपि॥१९॥

पदादपिब्रह्मपदमाअभिव्याप्यतस्मादपिविरज्य॥ विरागंप्राप्यसर्वत्रपुत्रा दिकेष्वपिघृणांज्जुगुप्सांवितत्य॥१९॥

मुक्तिमार्गेषु मुक्तिसाधनेषु श्रद्धालुर्भक्तिमान्वेदांतज्ञानलिप्सया ॥ औपनिषद ज्ञानलाभेच्छयातंत्वौपनिषदं पुरुषं पृच्छामीतिश्रुतिः तद्विज्ञानार्थं सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठमितिश्रुतेः उपायनकरोभूत्वा फला

श्रद्धालुर्मुक्तिमार्गेषु वेदांतज्ञानलिप्सया ॥ उपायनकरो भूत्वा गुरुं ब्रह्मविदं व्रजेत् ॥ २० ॥ सेवाभिः परितोष्यैनं चिरकालं समाहितः ॥ सर्ववेदांतवाक्यार्थं श्रृणुयात्सुसमाहितः ॥ २१ ॥

दि गृहीत्वाब्रह्मनिष्ठं गुरुं व्रजेत् ॥ २० ॥ सेवाभिश्चिरकालं एनं गुरुं परितोष्य मांसहितः ॥ एकाग्रचित्तः सन् सर्ववेदांतवाक्यार्थं श्रृणुयात् ॥ २१ ॥

सर्ववेदांतवाक्यानांमयितात्पर्यंनिश्चयः। उपक्रमोपसंहारवाक्यनिश्चयैः
यतोवाइमानिभूतानिजायंते॥येनाःजातानिजीवंतियत्प्रयंत्यभिसंविशं

सर्ववेदांतवाक्यानांमयितात्पर्यनिश्चयं॥श्रवणं
नामतत्प्राहुःसर्वेतेब्रह्मवादिनः॥२२॥

तीत्तिउपक्रमवाक्यंनेहनानास्तीत्तिकिंचनेत्ति॥उपसंहारवाक्यमित्या
दिवेदांतवाक्यानांमायियस्तात्पर्यनिश्चयस्तंशृणुयात्॥तच्छ्रवणंना
मब्रह्मवादिनःप्राहुः॥२२॥

श्रुतस्य वाक्यार्थस्योपबृंहणं विस्तारेणावबोधनं कथं चेत्यत आह ॥ लोहमणीति ॥ चुंबकमणेः सन्निधानादचेतनमपि लोहं यथा तथात्मनः

लोहमण्यादिदृष्टांतयुक्तिभिर्यद्विवेचनं । तदेवम
ननं प्राहुर्वाक्यार्थस्योपबृंहणं ॥ २३ ॥ ॥

सन्निधानाद्बुध्यादिकमपि व्यापृतं भवतीति ॥ अनुकूलयुक्तिभिस्तत्त्वैर्यद्विचिंतनं तन्मननं प्राहुः ॥ २३ ॥

॥ निर्ममः ममताहीनः ॥ पुत्रगृहादिषु ॥ निरहंकारो देहादौ ॥ समः सर्वत्र पुत्रमित्रद्वेष्येषु ॥ संगवर्जितः ॥ विषयेषु आसक्तिरहितः ॥ सदाशांत्यादियु

निर्ममो निरहंकारः समः संगविवर्जितः ॥ सदाशांत्यादियुक्तः सन्नात्मन्यात्मानमीक्षते ॥ २४ ॥ ॥

क्तः शमदमादियुक्तः सन् आत्मनि बुद्धिसाक्षिणि ॥ आत्मानं परमात्मानं यत्सदा ध्यानयोगेन ईक्षते तन्निदिध्यानं संस्मृतमित्यनंतरेण संबंधः ॥२४॥

सर्वकर्मक्षयवशात्‌आत्मनःसाक्षात्कारःकस्यचिच्छीघ्रंजायते॥ कस्य

यत्सदाध्यानयोगेन तन्निदिध्यासनं स्मृतं॥ सर्व
कर्मक्षयवशात्साक्षात्कारोपिचात्मनः॥२५॥ कस्य
चिज्जायतेशीघ्रंकस्यचिच्चिरकालतः॥ कूटस्था
नीहकर्माणिकोटिजन्मार्जितान्यपि॥२६॥ ॥

चिच्चिरकालेनः॥२५॥ कूटस्थानीति॥ कोटिजन्मसंपादितान्यपिकूटस्था
निसमूहीभूतानिकर्माणि॥२६॥ ॥ ॥

ज्ञानेनैव विनश्यंति न तु कर्मायुतैः तथा च ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसा
त्कुरुतेऽर्जुन ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ज्ञानं लब्ध्वा परां शां
तिमचिरेणाधिगच्छतीति च भगवद्वचनात् ॥ शंकर भगवद्भिरप्येवमेव ब

ज्ञानेनैव विनश्यंति न तु कर्मायुतैरपि ॥ ज्ञानादूर्ध्वं
तु यत्किंचित्पुण्यं वा पापमेव वा ॥ २७ ॥ ॥

हुग्रंथेषु प्रतिपादितं तेनैव पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सीध्य
तीति उक्तत्वात् ॥ ज्ञानादूर्ध्वमिति न कर्मणा लिप्यते न पापकेन न पुण्य
पापे मम नास्ति बंधः न कर्मणा वर्धते नो कनीयादित्यादिश्रुतिभ्यः २७ ॥

ननु एवं ज्ञाने सति शरीरमपि किं न पतेत् तत्राह ॥ शरीरारंभकमिति ॥ यत्तु आरब्धफलकर्मणा न च्छरीरावच्छेदेन भोगप्रदं प्रारब्धं तद्भोगेनैव नष्टं स्या

क्रियन्ते बहुवास्यं वा नन्तेनायं विलिप्यन्ते ॥ शरीरारंभकं यत्तु प्रारब्धं कर्म तन्मतं ॥ २८ ॥ तद्भोगेनैव नष्टं स्यान्न तु ज्ञानेन नश्यति ॥

न्न तु ज्ञानेन प्रारब्धं त्विह भुज्यनामथ परं ब्रह्मानास्थीयतां आरब्धे कर्मणि क्षीणि व्यवहारा निवर्त्तन्त इत्याचार्यैरुक्तत्वात् ॥ २८ ॥ ॥ ॥

एवं च सति जीवन्मुक्तो भवतीति तदवस्थामाह । निर्मोह इति सर्वभूते-
ष्विति सर्वभूतेषु आत्मानं यः पश्यति यश्च आत्मनि अधिष्ठाने सर्वभूता-

निर्मोहो निरहंकारो निर्ममः संगवर्जितः ॥ २९ ॥ सर्व-
भूतेषु चात्मानं सर्वभूतानि चात्मनि ॥ यः पश्यन्सं-
चरत्येष जीवन्मुक्तोभिधीयते ॥ ३० ॥ ॥ ॥

नि पश्यन् सन् संचरति एषः जीवन्मुक्तोभिधीयते ॥ ३० ॥ श्रीउमापति

अहिनिर्वल्विनी उरगनिर्मुक्तत्वक्पूर्वमज्ञाने भयप्रदा भवति॥ ज्ञानेन तु भयप्रदा॥ न तद्वत्॥ अयं जनः जन्यत्त इति जनः प्रपंचद्रष्टुर्ब्रह्मसाक्षात्का

अहिनिर्वल्विनी यद्वद्द्रष्टुः पूर्वं भयप्रदा॥ न ततोऽस्य न भयं किंचित्तद्वद्द्रष्टुरयं जनः॥३१॥

रवतः भयप्रदो न भवेत्॥ तथा च भयदुःखादिकं अधिष्ठानतत्वानवधारणनिबंधनमिति भावः॥३१॥

इदानी मुक्तार्थे कथुवल्लीश्रुतिं प्रमाणयति ॥ यदा सर्वे इति ॥ यदा सर्वे कामाः विषयाः ॥ प्रतिबोधात् प्राक् ये अस्य हृदि श्रिताः भवंति ते सर्वे कामाः

यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः ॥ अथ
मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुते ॥ ३२ ॥ ॥

यदा प्रमुच्यंते मुक्ताः भवंति ॥ अथ मर्त्यो मरणधर्मा अमृतो भवति मरणरहितो भवति ॥ अत्र शरीरे ब्रह्म समश्नुते प्राप्नोति ॥ ३२ ॥ ॥

हृदयस्य ग्रंथयः कामवासनाः यदैव प्रभिद्यंते नष्टाः भवंति अथ तदनंतरं
नदैव मर्त्योपि अमृतो भवतीति अनुशासनात् श्रुतिभिः शासनात् ॥ ३३ ॥

यदा सर्वे प्रभिद्यंते हृदयस्यैव ग्रंथयः ॥ अथ मर्त्योमृ
तो भवत्येतावदनुशासनात् ॥ ३३ ॥ मोक्षस्य नहि
वासोस्ति न ग्रामांतरमेव वा ॥ अज्ञानहृदयग्रंथिना
शो मोक्ष इति स्मृतः ॥ ३४ ॥ ॥ ॥

मोक्षस्येति स्पष्टं । किंच मोक्षो देहावसानं नापेक्षते इति सदृष्टांतमाह ॥ ३५ ॥

॥वृक्षाग्रादिति॥वृक्षाग्र्येति॥यदाच्युतपादः सतदैव अधःपतति॥ नद्वत् ज्ञान
वतः साक्षात्कारवतोपि मुक्तिः निश्चिता॥३५॥ किंच तस्य तीर्थक्षेत्रादिग

वृक्षाग्राच्च्युतपादो यस्त्वरयैव पतत्यधः॥ तद्वज्ज्ञान
वतो मुक्तिर्जायते निश्चितापिहि॥३५॥ तीर्थे चांडाल
गेहे वा यदि वा नष्टचेतनः॥ परित्यजन्देहमिमं ज्ञा
नादेव विमुच्यते॥३६॥

मेनश्चेद्यापिमास्त्वित्याह तीर्थइति नष्टचेतनः नष्टबुद्धिरपि ज्ञानादेव सा
क्षात्कारसमय एव विमुच्यते॥ ज्ञानादेवनु कैवल्यं ब्रह्मवेद ब्रह्मैव भवतीति
मुक्तिप्रतिपादनादिति॥३६॥

किंचवसनाशनादिष्वपितस्यनिर्बंधोमास्त्वित्याह॥ संवीऽतइतियेनकेनापि कंथादुकूलादिनासंवीतःपरिवृतःभक्ष्यंअभक्ष्यंमेध्यामेध्यादि॥ मिष्टान्नि ष्टादि॥ यत्रकुत्रापिपर्यंकेधूल्यादौसर्वात्मासःमुक्तएव॥ निद्राभिक्षास्नान

संवीतोयेनकेनाश्नन् भक्ष्यंवाभक्ष्यमेववा॥ शयानो
यत्रकुत्रापिसर्वात्मामुच्यतेतुसः॥ ३७॥ क्षीराद्यदाज्य
मुद्धृत्यक्षिप्तंपयसितत्पुनः॥ नतेनैवैकतांयातिसं
सारेज्ञानवांस्तथा॥ ३८॥

शौचेनेच्छामिनकरोमिचद्रष्टारश्चेत्कल्पयंतुकिंमेस्यादन्यकल्पनादि त्याचार्यैरुक्तत्वात्॥ ३७॥ कर्मासंसर्गेदृष्टांतमाह॥ क्षीरादिति॥ ज्ञानवां स्तथानिर्लेपः॥ ३८॥

मननश्रवणादिफळमाह ॥ नित्यमिति ॥ मननश्रवणयोरपि एकरूपमेव फलं देहबंधनात् ॥ संसारात् अनायासेनेति ॥ योगाभ्यासादिनैरपेक्षात्

नित्यं पठति योध्यायमिमं राम श्रृणोति वा ॥ समुच्यते देहबंधादनायायासेन राघव ॥ ३९ ॥ ततः संयतचित्तः सन् नित्यं पठमहीयते ॥ अनायासेन तेनैव सर्वथा मोक्षमाप्स्यसि ॥ ४० ॥ श्रीउमापति

३९ ॥ ततः भो राम महीपते संयतचित्तः सन् नित्यं पठ श्रृणु च तेनैव श्रवणपठनादिना अनायासेन मोक्षमाप्स्यसि ॥ ४० ॥ इति श्री अय्याजीदिक्षितविरचि

तायांसुबोधिन्यांतात्पर्यदीपिकायांत्रयोदशोध्यायः॥१३॥ ७॥ ७॥

इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुब्रह्मशिवराघवसंवादेमोक्षयोगोनामत्रयोदशोध्यायः॥१३॥

श्रीशिवशंकरउमापतियनमोनमः॥ श्रीरामसमर्थायियनमः॥ ७॥ ७॥

एवंतावत्पूर्वाध्यायांते शांत्यादियुक्तस्यात्मन्यात्मानमात्मत्वेन सर्वधर्मवि
हीनसत्यज्ञानानंदात्मकत्वेन पश्यतो मनोवागाद्यगोचरत्वप्रतिपादनाद्दुः
खगाहत्वेन प्रतिपादितं तत्र चित्तप्रवृत्त्यपायं वक्तुं उक्तानुवादपूर्वकं रामे

श्रीराम उवाच ॥ भगवन्यदि ते रूपं सच्चिदानंदवि
ग्रहं ॥ निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं ॥१॥

स्य प्रश्नमवतारयति ॥ राम उवाच ॥ भगवन्निति ॥ भगवानुक्तार्थः ते तव आ
त्मरूपं इक्ष्यते ॥ यदीति प्रश्ने आक्षेपः यदीक्ष्यते तर्हि मनोवागाद्यगोचरत्वे
खत्वीक्षणे ॥१॥ ॥

मिति उपायजिज्ञासाचोपायमज्ञानानः सन् तेनोपायाज्ञानेन खिन्नोस्मि
हे शंकरेति न दुपायं देवोसत्यपि स्वेदो न युक्त इति भावः सद सत्प्रति पक्षः॥
चित्तमसः प्रतिपक्ष आनंदो दुःखप्रतिपक्षः परमप्रेमास्पद एतत्त्रिकं लक्ष

सर्वधर्मविहीनंच मनोवाचामगोचरं॥ सर्वव्या॥
ने पिनमात्मानमीक्षे सर्वतः स्थितं॥७॥

णाविग्रहो [illegible] निष्कलं वृध्यादि रहितं क्रियारहितं शांतं उपरतं निरवद्यं दो
निरं षरहितं जनमायादोषहीनं सर्वधर्मविहीनं स्थूललिंगदेहादिधर्मरहितं॥ ७२॥

आत्मविद्या तपोमूलं अध्यात्मविद्या हि तमिन मे ध्यानानादिरूपं तपः तेन एव मूलं प्राप्तिसाधनं यस्य तत् ॥ तच्च ब्रह्म हि षयत्वेपि तत्पदलक्ष्यं ॥ ब्रह्मणो वेदस्य या उपनिषदस्ता एव परं गमकं यस्य अमूर्त्तं निरवयत्वात् ॥ सर्वभूतात्मा

आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं ॥ अमूर्तं सर्वभूतात्माकारं कारणकारणं ॥ ३ ॥ यत्तदद्रश्यमग्राह्यं तद्ग्राह्यं वा कथं भवेत् ॥ अतो धायमजानानः स्तेन खिन्नोस्मि शंकर ॥ ४ ॥ श्रीशिवमहेश्वरो नमः ॥ १३ ॥

कारं ॥ प्रत्यक्चेतनरूपं कारणकारणं अव्यक्तादेः कारणं यत्तदद्रश्यमग्राह्यं एतादृशं स्वरूपं मनोवाचामगोचरं तदृशं ग्राह्यं वा कथं भवेदिति चतुर्णां संबंधः ॥ ४ ॥

वे

एवं प्रश्ने श्रीभगवानुवाच ॥ शृण्विति हे राम तत्त्वस्वरूपसाक्षात्कारे उपायं
शृणु ॥ तमेवाह ॥ सगुणोपासनाभिः सगुणध्यानादिभिः चित्तैकाग्र्यं वि
धाय संपाद्यं स्थूलारुंधतिकान्यायात् तत्र सूक्ष्मे निरुपाधिके स्वरूपे चित्तं

श्रीशंकर उवाच ॥ शृणु राम प्रवक्ष्यामि तत्रोपा
यं महाभुज ॥ सगुणोपासनाभिस्तु चित्तैकाग्र्यं विधाय च ॥ ५ ॥

प्रवर्त्तयेत् ॥ स्थूलारुंधतिकान्यायस्तु अरुंधतिकानक्षत्रं अतिसूक्ष्मं त
न्निकटे स्थूलनक्षत्रे दर्शनेन अरुंधतिकादर्शनं संभावनीयं ॥ एवमत्रापि ज्ञेयं ॥ ६ ॥

तस्मिन्प्रसिद्धेन्नमये पिंडे पार्थिवे अन्नमयं हि सौम्य विद्धि निश्रवणात् ॥ तनूभृतां अ० ॥ जीवानां संबंधिनि स्थूलदेहे कीदृशे जन्मव्याधिजरामृत्युनिलये एतादृशे ॥ १४ ॥

स्थूलाहं धातिकन्यायां तत्र चित्तं प्रवर्त्तयेत् ॥ तस्मिन्नन्नमये पिंडे स्थूलदेहे तनूभृतां ॥ ६ ॥ जन्मव्याधिजरामृत्युनिलये वर्त्तते दृढा ॥ आत्मबुद्धिरहंमानात्कदाचिन्नैव हीयते ॥ ७ ॥ ॥ ॥

देहे अहंमानादहंकारात् ॥ आत्मबुद्धिः दृढा वर्त्तते कदाचिन्नैव हीयते आत्मसाक्षात्काराविधि न नश्यति ॥ ७ ॥ ॥ ॥

इदानीमुभयोर्वैलक्षण्यं प्रतिपादयति॥ आत्मा न जायते येतो नित्यः क
थंचन न म्रियते वा देहस्तु संजायते स्ति विपरिणमते चर्द्धते क्षीयते नश्य

आत्मा न जायते नित्यो म्रियते वा कथंचन॥ वपुरुत्प
द्यते लोके वपुरेवं लीयते॥ ८॥ संजायते स्ति विपरिण
मते वर्द्धते पि च॥ ८॥ क्षीयते नश्यतीत्येते षड्भावा वपु
षः स्मृता आत्मनो न विकारित्वं घटस्थ नभसो यथा॥ ९॥

ति चेत्येते षड्भावाः वपुषो देहस्य आत्मनो न विकारित्वं तस्मादयमात्मा
संगोदासीनो निर्लेपः वपुस्तु षड्भावविकारवदिति बुधो विद्वान् संचिंतयदिति॥ ९॥

इदानीमन्नमयादभ्यांतरतमंप्राणमयंवदितुमाह॥ मूषेतिअ॰न्नकोशपं
चकमध्ये प्राणमयकोशास्तु मूषानिक्षिप्तहेमाभ इति॥१०॥ वर्त्तत इति अन्नम
यादंतरतरे च देहे प्राणमयःकोशो वर्त्तते कीदृशः प्राणादिदशभिरपि वा

एवमात्मा वपुस्तस्मादिति संचिंतयद्बुधः॥ मूषानिक्षिप्त
हेमाभः कोशः प्राणमयोत्र तु॥१०॥ वर्त्तते तरतो देहे बद्धः
प्राणादिवायुभिः॥ कर्मेंद्रियैः समायुक्तश्चलनादिक्रियात्मकः॥११॥

युभिर्बद्धः समन्वित इत्यर्थः॥ तथा च श्रुतिः तस्माद्वा एतस्मादन्नरसमयाद
न्योंतर आत्मा प्राणमयः॥ तेनैष पूर्ण इत्युक्तत्वात्तस्यैवोपव्याख्यानं च॥ तदप्ये
ष श्लोको भवतीत्यभिधाय तस्यैष एव शारीर आत्मेति प्रत्ति पाद पादयन्ति
किंच कर्मेंद्रियैः समायुक्तः पादादीनां क्रियास्तदात्मकश्चलनादिक्रियात्मकः॥११॥

किंच क्षुत्पिपासे प्राणस्यैत्यकत्त्वात्॥ क्षुत्पिपासापरित्तः किंच यतो जडोऽतो
यनायमात्मा उक्तरूपप्राणकोशादात्मानं वैलक्षण्येन द्योनयति चिद्रूप इति
येनैवं हेतुना स्वदेहादिकमनुपश्यति अतश्चिद्रूपः॥१२॥ तादृशाजीवाभिन्न

क्षुत्पिपासापरीभूतो नायमात्मा यतो जडः॥ चिद्रूप
आत्मा येनैव स्वदेहमनुपश्यति॥१२॥ आत्मैवाहं परं
ब्रह्म निर्लेपः सुखनीरधिः॥ न तदश्नाति किंचैतं न तदश्नाति कश्चन॥१३॥

त्वमात्मन आह आत्मेति आत्मैवाहं परं मायादिभ्यः बृहत्तोपि ब्रह्म आत्तो निर्लेपः
किंचाशनायाद्यभावमप्याह॥ तद्ब्रह्म एनं प्रकृतं प्राणादिकं च कंचनापि ना
श्नाति नात्माभिमानेन गृण्हाति प्राणादिर्वा कश्चन तद्ब्रह्म जीवस्वरूपाभिन्नं ना
श्नाति न विषयीकरोति॥१३॥

तत्र प्राणमयकोशो मनोमयः कोशोस्ति सः मनोमयः कोशः संकल्पविकल्पात्मा संकल्पविकल्पो आत्मा स्वरूपं यस्य ॥ बुद्धींद्रियसमायुक्तः ज्ञानेंद्रिय

तत्र प्राणमये कोशे कोशोस्त्येव मनोमयः ॥ ससंक॰
ल्पविकल्पात्मा बुद्धिंद्रियसमायुतः ॥ १४ ॥ कामः क्रो
धस्तथा लोभो मोहो मात्सर्यमेव च ॥ मदश्चेत्यरि
षड्वर्गो ममतेच्छादयोपि च ॥ १५ ॥ ॥ ॥

तः ॥ १४ ॥ कामो विषयेच्छा तत्प्रतिघाते क्रोधः लोभो धिकेच्छा मोहो ज्ञानं ॥ मात्सर्यं मत्सरो द्वेषः मदः गर्वः ममतेच्छादयोपि एते एतस्येपि प्रत्यक्षं निरुच्यमानस्य मनोमयस्य कोशस्य धर्माः ॥ १५ ॥ ॥ ॥

विज्ञानमयकोशम पवदंतियाकर्मेत्यादिना॥ तत्र मनोमयकोशेयाकर्मवि
षयाआदरेण कर्मप्रतिपादिकावेदशास्त्रार्थनिश्चितावेदोक्तशास्त्रोक्ता
र्थेनिर्निश्चितअत्रभाष्यकृद्भिःवदार्थविषयाबुद्धिर्निश्चयात्मिकाविज्ञानंतच्चा

मनोमयस्यकोशस्य धर्माएतस्यतत्रतु॥ याकर्म
विषयाबुद्धिर्वेदशास्त्रार्थनिश्चिता॥१६॥ ॥

ध्ययैवसायलक्षणंअंतःकर्णस्यधर्मःतन्मयाःनिश्चयविज्ञानैःप्रमाण
स्वरूपेनिर्वर्तितआत्माविज्ञानमयइत्युक्तं॥ तंत्रैवविशेषोद्रष्टव्यः॥ १६॥

सा तु निश्चयात्मिका बुद्धिरेव ज्ञानेंद्रियैः साऽर्द्धं स ह विज्ञानमयकोशतः को
शइत्यर्थः॥ सार्वविभक्तिकस्तन्तिः विज्ञानमयकोशइति वा पाठः॥ इह संसा

सा तु ज्ञानेंद्रियैः सार्द्धं विज्ञानमयकोशतः॥ इह क
र्तृत्वाभिमानी स एव तु न संशयः॥१७॥ ॥ ॥

रे स एव विज्ञानंमय एवा रहं कर्ता भोक्तेत्यभिमानी संदेहो नेवेति॥१७॥

किंचहाइमुत्रेति॥ इहमनुष्यलोकेआमुत्रस्वर्गलोकेगतिःगमनंभवति
सव्यावहारिकोजीवः।यावदज्ञानंऔपाधिकोजीवत्वमित्यर्थः॥१८॥ व्यो

इहामुत्रगतिस्तस्यसजीवोव्यावहारिकः॥ व्योमादि
सात्विकांशेभ्योजायंतेधींद्रियाणितु॥१९॥श्री०॥

मादीनांपंचमहाभूतानांसात्विकांशेभ्यःपंचज्ञानेंद्रियाणिजायंतेश्रवण
त्वक्रसनचक्षुर्घ्राणानिपंचानुक्रमंजायंते॥१९॥ श्रीरामसमर्थः॥

तान्यवाह॥ व्योम्न इति॥ व्योम्न आकाशाच्छ्रोत्रं॥ श्रवणं भुवो घ्राणेंद्रियं जलाज्जीह्वा रसनेंद्रियं तेजसः सम्भवः चक्षुरिंद्रियं वायोस्त्वगुत्पन्ना त्वगिंद्रियं एवं तेषामिंद्रियाणां भौत्तिकता पंचमहाभूतजन्यता॥१९॥ व्योमादीनामि

व्योम्नः श्रोत्रं भुवो घ्राणं जलाज्जिह्वा तु तेजसः॥ चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौत्तिकता ततः॥१९॥ व्योमादीनां समस्तानां सात्विकांशेभ्य एव तु जायते बुद्धिमनसी बुद्धिः स्यान्निश्चयात्मिका॥२०॥ ॥

ति व्योमादीनां समस्तानां सात्विकांशभ्यः एव तु दा ज्ञा तं॥ पूर्वस्माद्विशेषः मनस्तु संकल्पविकल्पात्मकमित्यर्थः॥ बुद्धिर्निश्चयात्मिका॥२०॥ ॥

इदानीं वागादीनामुत्पत्तौ विशेषमाह॥ यथाक्रमं व्योमादीनां व्यस्तेभ्यो रजोंशेभ्यो वागादीन्युत्पन्नानि॥२१॥ व्योमादीनां सप्तसमस्तेभ्यो रजोंशेभ्यः

वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि तु॥ व्योमादीनां रजोंशेभ्यो व्यस्तेभ्यस्तान्यनुक्रमात्॥२१॥
समस्तेभ्यो रजोंशेभ्यः पंचप्राणादिवायवः॥ जायंते सप्तदशकमेवं लिंगशरीरकं॥२२॥ ॥

पंचप्राणादिवायवः जायंते॥ एवं सप्तदशकं लिंगशरीरमेव शरीरकं ॥२२॥ ॥

एवंलिंगशरीरमुत्का नंसैयानंदमयकोशत्वमाह ॥ एवमितियत्तश्चैत
नायत्तेःपरस्पराध्यासयोगात् ॥

एवंलिंगशरीरंतुतत्यायःपिंडवद्यतः ॥ परस्परा
ध्यासयोगात्साक्षिचैतन्यसंयुतः ॥ २३ ॥ श्रीहर

अन्योन्याध्यासयोयोगात् ॥ तत्पायःपिंडवत् ॥ चेत्तनापत्तिवशा
त्साक्षिचैतन्यसंयुतः ॥ २३ ॥ ॥ ॥

तेदैवानंदमयः केशः अत्रानंदशब्दः कार्यात्मैव ॥ अधिकारामय
इशब्दाच्चेति भाष्यं सः ॥ भोक्तृत्वं प्रति पद्यते इह भूमौ अमुत्र स्वर्गे
विद्याफलं उपासनाफलं आदिशब्दात् मिश्रफलं येते षां भोक्तासः

तदानंदमयः कोशो भोक्तृत्वं प्रति पद्यते ॥ विद्याक
र्मफलादीनां भोक्तेहामुत्र सस्मृतः ॥ २४ ॥ ॥

आनंदमयः कोशः श्रुतिस्मृतिभिः अनिष्टफलं च गृह्यते ॥ अनिष्ट
मिष्टं मिश्रं च त्रिविधं कर्मणः फलमिति भगवद्वचनात् ॥ भोक्तेति स्मृतः ॥ २४ ॥

ननुसाक्षिचैतन्यसंयुक्तोभोक्तृत्वंप्रपिपद्यइतत्फक्तंतदसंगत्तं।एक
स्यैवसाक्षिताभोक्तृताचेन्निर्द्वंधंविरुध्यत्तइत्याशंकामयनुदतियदे

यदाध्यासंविहायैषःस्वस्वरूपेणतिष्टति।अविद्या
मात्रसंयुक्तःसाक्ष्यात्माजायत्तेतदा॥२५॥ ॥

त्यादिनायदाएषश्चिद्रूपआत्मास्वस्वरूपेण॥अविद्युतचिद्रूपेणअ
ध्यासंविहायतिष्टतिअविद्यामात्रसंयुक्तःमूलाविद्यामात्रेणयुक्तःस
न्नतदासाक्ष्यात्माजायत्ते॥२५॥

तत्स्वरूपमाह॥ अंतःकरणादिनां द्रष्टेत्ति यत्प्राणेन न प्राणिति येन प्राणः प्राणीयते येयच्छ्रोत्रेण न शृणोत्ति येन श्रोत्रमिदं श्रुतं यन्मनसा न मनुते येनाहुर्मनो मतमित्यादिश्रुतेः अंतःकरणत्तद्वृत्ति साक्षी चैतन्य विग्रहः

द्रष्टांतःकरणादीनामनुभूत्तेः स्मृत्तेरपि॥ अतोंतः
करणाध्यासादध्यासित्वेन चात्मनः॥ २६॥ भोक्तृत्वं
साक्षितां चेत्तिर्हि धंत्त स्यापपद्यत्ते॥ २६॥ ॥

आनंदरूपः सत्यः सन् किनात्मानं प्रपद्यस्व इत्याचार्योक्तेश्च तथा अनुभूतेः स्मृतेरपि द्रष्टेत्यर्थः फलितमाह॥ अंतकरणाध्यासात्॥ अंतःकरस्य स्याध्यासात्॥ आत्मनि चांतःकरणस्याध्यस्तत्वेन च भोक्तृत्वं अविद्यासंबंधमात्रेण साक्षितां चेत्तिर्हि धंत्त स्यापपद्यंते॥ २६॥ ॥

अत्रदृष्टांतमाह॥आतपइतिस्य ष्टं एकइति॥ एकः सा॥क्षी आत्माभोजयि
ताजीवात्मानं प्रति सुखदुःखादिएकः अध्यासवान् जीवात्माकर्मणःफलं

आतपश्चापितच्छायानत्वकाशेविराजते॥२७॥ एको
भोजयितातत्र भुंक्तेन्यः कर्मणःफलं॥ क्षेत्रज्ञं रथिनं
विद्धिशरीरंरथमेवच॥२८॥ श्री गौरीपतियनमः

सुखदुःखात्मकं भुंक्ते॥२७॥ एतदेवरथिकरूपकेननिरूपयति॥ क्षेत्र
ज्ञं क्षेत्राभिमानिनं देहिनं रथिनं विद्धिशरीरं रथंचविद्धि॥२८॥ ॥

गोचरीक्रियंत इति गोचरः संचरणदेशास्तान् शब्दादीन् विषयान् तेषु इं
द्रियेषु विषयसप्तमी ॥ २८ ॥ फलिनमित्ति इंद्रियैर्मनसा युक्तं पुरुषं भोक्तारं

बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इंद्रियाणि हया
न् विद्धि विषयां स्तेषु गोचरान् ॥ २९ ॥ इंद्रियैर्मनसा
युक्तं भोक्तारं विद्धि पूरुषं । एवं शांत्यादियुक्तः सन्नुपा
स्ते यः सदा हि द्विजः ॥ ३० ॥ ॥ ॥

विद्धि ॥ २९ ॥ साक्षिस्वरूपमाह । एवं शांत्यादियुक्तः सन् यः द्विजः सदा उपा
स्ते उपासनया निर्विशांतांतःकरणः अनेन उपासनेन मनो वशीभवतीत्यर्थः ॥ ३० ॥

॥उद्घाटयनिष्काश्य॥कदलीतरोःवल्कलानियथात्तथा॥३१॥तथैवपं

उद्घाट्यात्माद्याधैकमेकंयथैवकदलीतरोः॥ वल्क
लानित्ततः पश्चाल्लभतेसारमुत्तमं ॥३१॥ तथैव
पंचभूतेषुमनःसंक्रामयेत्क्रमात्॥ तेषांमध्येततः
सारमात्मानमनुविंदति॥३२॥ ॥ ॥

चभूतेषुपंचकोशेषुमनःसंक्रामयेत्॥बाह्यबाह्यापनोदनेनततःसं
क्रममाणानंतरंसारभूतमात्मानमनुविंदति॥३२॥ ॥

एवमिति॥ मनसि संयत आत्मग्रहणे सन्नद्धचित्तः मनसि मनः समाधाय उपासनादिना मनसैव मनः संयमनं कृत्वा मनसैवानुद्रष्टव्यं दृश्यते त्व

एवं समाधाय मनः संयतो मनसि द्विजः॥ अथ प्र

वर्त्तयेच्चित्तं निराकारे परात्मनि॥ ३३॥ ॥

ग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरित्यादि श्रुतिभिरुपासनानि शितां तःक रणवेद्यत्वप्रतिपादनादिति भावः अथ संयतमनसं यत्यनंतरं चित्तं निराकारे परात्मनि प्रवर्त्तयेत्॥ ३३॥ ॥ ॥

ततोमनःकर्तृकेवलं अहंकारादिभ्यःनिःकष्टंचेतन्मपरमात्मानंप्र
गृण्हातितत्स्वरूपमाहयत्तदमाँहँदेश्यमग्राह्यमिति॥अदृश्यंनिर्देश्या

ततोमनःप्रगृण्हात्तिपरमात्मानमेकलं॥यत्तद
दृश्यमग्राह्यमस्थूलाद्युक्तिगोचरं॥३४॥ ॥

नर्हंमनोऽविषयंअदृश्यमितिपाठेचक्षुराद्यविषयंआग्राह्यंपाण्याद्यवि
षयं॥अस्थूलाद्युक्तिगोचरंअस्थलंअनणुअहस्वंइत्यादिमुक्तिविषयं॥३४॥

ननु एवमुपासनानिष्ठस्य साक्षात्कारश्चेत्तर्हि तत्साधनेषु जनाः किं न प्रवर्त्तेरन् नित्याकांक्षायां रामः प्रश्नमवतारयति। भगवन्निति श्रवणे वेदांतार्थविचारे॥ ३५॥ शृण्वंतोपि आत्मानं नैव जानंत्ते असंभावनायस्तत्वा

राम उवाच॥ भगवन् श्रवणे नैव प्रवर्त्तंते जनाः कथं॥
वेदशास्त्रार्थ संयन्मा युञ्ज्यानः सत्यवादिनः॥ ३५॥ शृण्वं
तोपि तथात्मानं जानंते नैव केवलं॥ ज्ञात्वापि मन्यते मि
थ्या किमेतत्तव मायया॥ ३६॥ ॥ ॥

तज्ज्ञात्वापि तत्वमस्यादि वाक्यार्थं बुध्वापि विपरीतभावनायस्तामिथ्या मन्यंते एतत् किं तवमायया इति ज्ञातेप्यर्थे विचिकित्सा। तथाहि ज्ञातसारोपि खल्वेकः संदिग्धे कार्यवास्तुनीति॥ ३६॥

श्रीभगवानुवाच॥ उत्तरं एवमेवमहाबाहो इति हे महाबाहो एवमेवमायैवव्यामोहकारिणीत्यत्र विचारो नैवकार्यः मेव निर्वक्ति देवि ति॥ देवस्य इयं देवी ब्रह्ममहिषी एषा प्रसिद्धा गुणमयि अजामिका

श्रीभगवानुवाच॥ एवमेव महाबाहो नात्र कार्यविचारणा॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते॥ ३७॥

मित्यादौ गुणमेख्याः प्रसिद्धत्वात् त्रिगुणात्मिका॥ एतादृशी मम माया दुरत्यया॥ अदांतैः तिःकरणैरनतिक्रमणीया मामेव ये प्रपद्यंते मायामयं तित्तरंति जहात्येनां भुक्तभोगामजोन्य इति श्रुतेः स्वाश्रयाव्यामोहकत्वात्॥ मद्भक्तान् प्रति व्यावर्त्तत इत्याकूतं॥ ३७॥

इदानीमज्ञो ह्यकोऽनुषमाणो नुश्रैतं शोत इत्यत्र हेतुं वदत्। विशदयति अ
भक्ता य इति स्पष्टं ऐहिकं दइहभवं ऐहिकं धनध्यानादिकं आमुष्मिकं अ

अभक्ता ये महाबाहो मम श्रद्धाविवर्जिताः॥ फलंका
मयमानास्ते त्वैहिकामुष्मिकादिकं॥३८॥ क्षयिष्णु
त्वं सातिशायं यतः कर्मफलं मतं॥ तदविज्ञाय कर्मा
णि ये कुर्वंति नराधमाः॥३९॥ ॥ ॥

मुष्मिन् परलोके भवं स्वर्गादि यतः कर्मफलं॥ क्षयिष्णु अनित्यं सातिशायं
